PRABODHA
CHANDRODAYA.

SANSCRITE ET LATINE EDIDIT

HERMANNUS BROCKHAUS.

FASCICULUS PRIOR

CONTINENS

TEXTUM SANSCRITUM.

B. 1/4.

PRABODHA CHANDRODAYA.

FASCICULUS PRIOR

CONTINENS

TEXTUM SANSCRITUM.

PRABODHA

CHANDRODAYA

KRISHNA MISRI

COMOEDIA.

SANSCRITE ET LATINE EDIDIT

HERMANNUS BROCKHAUS.

LIPSIAE,

PROSTAT APUD F. A. BROCKHAUS

MDCCCXXXV.

PRAEFATIO.

J. Taylor, vir sagacitatis eximiae in gravissimis disciplinis, et mathematicis et philosophicis, explicandis, hoc Krishna Misri drama metaphysicum Anglice vertit, philosophicasque Indorum doctrinas, tunc temporis ne libatas quidem, notis illustravit *). Quam egregie et accurate in negotio hoc difficili versatus sit, Sanscritae linguae periti nunc ipsi iudicare possunt.

Qui hodie et linguam et disciplinas Indorum cognoscendi excitatus est ardor, atque dramatis pulcritudo, quae tanta est, ut etiam e versione sentiatur, me ad textum Sanscritum iis, qui his studiis favent, ante oculos ponendum impulit.

Codices, quibus in edendo textu usus sum, omnes in bibliotheca Collegii Mercatorum in Indiam commeantium conservantur, quos equidem hisce siglis notavi:

T. Ex libris Taylorii. Samvat 1864. (A. Ch. 1808.) (Vide Taylor praef. p. V.)

A. Ex libris principis Gaikavar, in Catalogo No. 1868. notatus. Samvat 1858. (A. Ch. 1802.)

B. Ex libris Colebrookii No. 44.

C. — — — No. 196. Codex duorum librariorum inter se alternantium calamo exaratus.

*) Titulus libri, in Anglia ipsa rarissimi, hic est: *Prabodh Chandrodaya*, or the Moon of Intellect; an allegorical Drama; and *Atma Bodh*, or the Knowledge of Spirit; translated by J. Taylor, M. D. London 1812. 8vo. XV et 121 pp. (ex Anglicis maximam partem Germanice reddidit *I. G. Rhode* in libro: Beiträge zur Alterthumskunde, Berolini 1820, in 2do fasciculo).

Codices supra memorati omnes chartacei sunt, literis Devanagaricis exarati, et textum *Râma Dâsi* scholiis instructum continent.

D. Ex libris Colebrockii No. 774. Cod. chart. septem foliis versionem Prâcritorum locorum Sanscritam, a *Govindo* Astronomo (*jyotirvid*) conscriptam, continens. Codex ab auctore ipso exaratus videtur.

E. Ex libris Colebrookii No. 221. Cod. chart. lit. Dev. exaratus, Râma Dâsi commentarium continens.

Quum Londini versarer, *Christianus Lassen*, Vir clarissimus, praeceptor meus semper pie colendus, insigni sua in me benignitate plagularum corrigendarum munus suscepit, et quae inveniantur vitia, non eius culpa, sed mea in describendo codice negligentia orta sunt.

Textum iam typis exscriptum ante oculos habebam, quum Societati Asiaticae Londinensi Brachmanus doctissimus, nomine *Bhavânî Charana Sarman*, editionem eiusdem dramatis dono dedit. Editio bellissima, typis bengalicis impressa, *Mahesvari* scholiis instructa est *).

Quam Codices et editio Calicatensis praebent lectionis varietatem, cum versione latina et scholiis, ex utroque Commentario haustis, in secundo fasciculo mox publici iuris faciam.

Sed grato animo adhuc memorandi sunt Viri illustres, quorum in libris suppetendis liberalitate, rem propositam ad finem perducere licuit: *Carolus Wilkins*, eques, et *Thomas Horsfield*, Med. Dr., bibliothecae in Curia Indica praepositi, et *Henricus Harkness*, Tribunus militaris, Societati Asiaticae a secretis.

Londini mense Septembri 1834.

*) Titulus est: प्रबोधचन्द्रोदयनाटकं कलिकातानगरे समाचारचन्द्रिकायन्त्रे मुद्रितं शाकाब्दाः १७५४.

॥ प्रबोधचन्द्रोदयं ॥

॥ नाटकं ॥

॥ प्रथमोऽङ्कः ॥

॥ नान्दी ॥

मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः
खं वायुर्ज्वलनो जलं क्षितिरिति त्रैलोक्यमुन्मीलति ।
यत्तत्त्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमं
सान्द्रानन्दमुपास्महे तदमलं स्वात्मावबोधं महः ॥ १ ॥

अपि च ।

अन्तर्नाडीनियमितमरुल्लङ्घितब्रह्मरन्ध्रं
स्वान्ते शान्तिप्रणयिनि समुन्मीलदानन्दसान्द्रं ।
प्रत्यग्ज्योतिर्जयति यमिनः स्पष्टलालाटनेत्र-
व्याजव्यक्तीकृतमिव जगद्व्यापि चन्द्रार्धमौलेः ॥ २ ॥

॥ नान्द्यन्ते सूत्रधारः ॥

सूत्रधारः ॥ अलमतिविस्तरेण । आदिष्टोऽस्मि सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलेन बलवद्रिपुञ्जवलस्तटकपाटपाटनप्रकटितनरसिंहरूपेण प्रबलतरनृपतिकुलप्रलयमहार्णवमेदिनीसमुद्धरणमहावराहेण निखिलदिग्विलासिनीकर्णपूरीकृतकीर्तिलतापल्लवेन समस्ताशास्तम्बेरमकर्णतालास्फालनबहलतरपवनसंपातनर्तितप्रतापानलेन श्रीमता गोपालेन यथा खल्वस्य सहजसुहृदो राज्ञः श्रीकीर्तिवर्मदेवस्य दिग्विजयव्यापारान्तरितपरब्रह्मानन्दरसैरस्माभिः समुन्मीलितविविधविषयरसस्पर्शदूषिता इवातिवाहिता दिवसा इदानीं तु कृतकृत्या वयं । यतः

नीताः क्षयं क्षितिभुजो नृपतेर्विपक्षा
रत्नावती क्षितिरभूत् प्रथितैरमात्यैः ।
साम्राज्यमस्य विहितं क्षितिपालमौलि-
मालार्चितं भुवि पयोनिधिमेखलायां ॥ ३ ॥

तद्वयं शान्तरसप्रायप्रयोगाभिनयेनात्मानं विनोदयितुमिच्छामः । तद्यत् पूर्वं तत्रभवद्भिः कृष्णमिश्रैः प्रबोधचन्द्रोदयं नाम नाटकं निर्माय भवतः समर्पितमासीत् तदद्य राज्ञः श्रीकीर्तिवर्मणः पुरस्तादभिनेतव्यं भवता । अस्ति चास्य भूपतेः सपरिषदो

ऽवलोकनकुतूहलमिति । तद्भवतु । गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि ।

॥ परिक्रम्य नेपथ्याभिमुखमवलोक्य ॥ आर्ये इतस्तावत् ।

प्रविश्य नटी ॥ एसम्हि । आणवेदु अज्जउत्तो को णिओओ अणुचिट्ठीअदु त्ति । *)

सूत्रधारः ॥ आर्ये विदितमेव भवत्या

अस्ति प्रत्यर्थिपृथ्वीपतिविपुलबलारण्यमूर्छत्प्रताप-
ज्योतिर्ज्वालावलीढत्रिभुवनविवरो विश्वविश्रान्तकीर्तिः ।
गोपालो भूमिपालान् प्रसभमसिलतामित्रमात्रेण जित्वा
साम्राज्ये कीर्तिवर्मा नरपतितिलको येन भूयोऽभ्यषेचि ॥

अपि च ।

अद्याप्युन्मदयातुधानतरुणीचञ्चत्कारास्फालन-
व्यावल्गन्नृकपालतालरणितैर्नृत्यत्पिशाचाङ्गनाः ।
उद्गायन्ति यशांसि यस्य विततैर्नादैः प्रचण्डानिल-
प्रक्षुभ्यत्करिकुम्भकूटकुहरव्यक्तै रणक्षोणयः ॥ ५ ॥

तेन च शालपथप्रस्थितेनात्मविनोदार्थं प्रबोधचन्द्रोदयाभिधानं नाटकमभिनेतुमादिष्टोऽस्मि । तदादिश्यन्तां भरता वर्णिकापरिग्रहणाय ।

*) एषास्मि । आज्ञापयत्वार्यपुत्रः को नियोगोऽनुष्ठीयतामिति ।

नटी ॥ सविस्मयं ॥ अज्जउत्त अच्चरिअं अच्चरिअं । जेण तधा णिअभुअबलविक्कमेक्कणिभच्छिदसअलराअमण्डलेण आकण्णाअकड्ढिअकठिणकोअण्डदण्डबहलवरिसन्तसरणिअरजज्जरीकिदतुरअतरङ्गमालं णिरन्तरणिवडन्ततिक्खणविक्खित्तसत्थसहस्सपलिअत्थउत्तुङ्गमाअङ्गमहामहीहरसहस्सं भमन्तभुअदण्डचण्डमन्दराभिघादघुम्मन्तसअलपत्तिसलिलसंघादं कण्णसेणासाअरं णिम्महिअ महुमहणेणेव खीरसमुद्दं आसादिदा समरविजअलच्छी तस्स संपदं सअलमुणिअणसलाहणिज्जवीरचरिदस्स कधं एरिसो उवसमो संवुत्तो । *)

सूत्रधारः ॥ आर्ये निसर्गसौम्यमेव ब्राह्मं ज्योतिः कुतोऽपि कारणात् प्राप्तविकारमपि पुनः स्वभावमेवावतिष्ठते । यतः सकलभूपालकुलप्रलयकालाग्निरुद्रेण चेदिपतिना समुन्मूलितं चन्द्रान्वयपार्थिवानां पृथिव्यामाधिपत्यं स्थिरीकर्तुमयमस्य संरम्भः । पश्य यथा–

*) आर्यपुत्र आश्चर्यमाश्चर्यं । येन तथा निजभुजबलविक्रमैकनिर्भर्त्सितसकलराजमण्डलेन आकर्णाकृष्टकठिनकोदण्डदण्डबहलवर्षच्छरनिकरजर्जरीकृततुरगतरङ्गमालं निरन्तरनिपतत्तीक्ष्णविक्षिप्तशस्त्रसहस्रपर्यस्तोत्तुङ्गमातङ्गमहामहीधरसहस्रं भ्रमद्भुजदण्डचण्डमन्दराभिघातघूर्णितसकलपत्तिसलिलसंघातं कर्णसैन्यसागरं निर्मथ्य मधुमथनेनेव क्षीरसमुद्रमासादिता समरविजयलक्ष्मीस्तस्य साम्प्रतं सकलमुनिजनश्लाघनीयवीरचरितस्य कथमीदृश उपशमः संवृत्तः ।

कल्पान्तवातसंक्षोभलङ्घिताशेषभूभृतः ।
स्थैर्यप्रसादमर्यादास्ता एव हि महोदधेः ॥ ६ ॥

अपि च भगवन्नारायणांशसंभूता भूतहिताय तथाविधाः पौरुषभूषणाः पुरुषाः क्षितिमवतीर्य निष्पादितकृत्याः पुनः शान्तिमेव प्रपद्यन्ते । यथा परशुराममेवाकलयतु भवती तावत् ।

येन त्रिःसप्तकृत्वो नृपबहुलवसामांसमस्तिष्कपङ्क-
प्राग्भारे ऽकारि भूरिच्युतरुधिरसरिद्वारिपूरे ऽभिषेकः ।
यस्य स्त्रीबालवृद्धावधिनिधनविधौ निर्दयो विश्रुतोऽसौ
राजन्यौघांसकूटक्रथनपटुरटद्घोरधारः कुठारः ॥ ७ ॥

सो ऽपि स्ववीर्यादवतार्य भारं
भूमेः समुत्खाय कुलं नृपाणां ।
प्रशान्तकोपज्वलनस्तपोभिः
श्रीमान् मुनिः शाम्यति जामदग्न्यः ॥ ८ ॥

तथायमपि कृतकर्तव्यः संप्रति परमामुपशमनिष्ठां प्राप्तः । येन च

विवेकेन विनिर्जित्य कर्णं मोहमिवोर्जितं ।
श्रीकीर्तिवर्मनृपतेर्बोधस्येवोदयऽ कृतः ॥ ९ ॥

॥ नेपथ्ये ॥ आः पाप शैलूषाधम कथमस्मासु जीवत्सु स्वामिनो महामोहस्य विवेकसकाशात् पराजयमुदाहरसि ।

सूत्रधारः ॥ ससंभ्रमं विलोक्य ॥ अये

उत्तुङ्गपीवरकुचद्वयपीडिताङ्ग
आलिङ्गितः पुलकितेन भुजेन रत्याः ।
श्रीमान् जगन्ति मदयन् नयनाभिरामः
कामोऽयमेति मदघूर्णितनेत्रपद्मः ॥ १० ॥

मद्वचनाच्चायमुपजातक्रोध इवोपलक्ष्यते । तदपसरणमेवास्माकमितः श्रेयः ।

॥ इति निष्क्रान्तौ ॥

॥ इति प्रस्तावना ॥

॥ ततः प्रविशति यथानिर्दिष्टकामो रतिश्च ॥

कामः ॥ सक्रोधं ॥ आः पापेति पठित्वा ॥ ननु रे भरताधम

प्रभवति मनसि विवेको विदुषामपि शास्त्रसंभवस्तावत् ।
निपतन्ति दृष्टिविशिखा यावन्नेन्दीवराक्षीणां ॥ ११ ॥
रम्यं हर्म्यतलं नवाः सुनयना गुञ्जद्द्विरेफा लताः
प्रोन्मीलन्नवमल्लिकाः सुरभयो वाताः सचन्द्रा निशाः ।
यद्येतानि जयन्ति हन्त परितः शस्त्राण्यमोघानि मे
तद्भोः कीदृगसौ विवेकविभवः कीदृक् प्रबोधोदयः ॥ १२ ॥

रतिः ॥ अज्जउत्त गुरुओ क्खु महाराअमहामोहस्स पडिवक्खो विवेओ त्ति तक्केमि । *)

कामः ॥ प्रिये कुतस्तवेदं स्त्रीस्वभावसुलभं विवेकाद्भयमुत्पन्नं । पश्य पश्य

अपि यदि विशिखाः शरासनं वा
कुसुममयं ससुरासुरं तथापि ।
मम जगदखिलं वरोरु नाज्ञा-
मिदमतिलंघ्य धृतिं मुहूर्तमेति ॥ १३ ॥

*) आर्यपुत्र गुरुः खलु महाराजमहामोहस्य प्रतिपक्षो विवेक इति तर्कयामि ।

तथा हि ।

अहल्याया जारः सुरपतिरभूदात्मतनयां
प्रजानाथो ऽयासीदभजत गुरोरिन्दुरबलां ।
इति प्रायः को वा न पदमपथे ऽकार्यत मया
श्रमो मद्बाणानां क इव भुवनोन्माथविधिषु ॥ १४ ॥

रतिः ॥ अज्जउत्त एव्वं णेदं । तधा वि महासहाअसंपण्णो सक्किदव्वो अरादी जदो स्स जमणिअमप्पमुहा अमच्चा महाबला सुणीअन्ति । *)

कामः ॥ प्रिये यान् एतान् राज्ञो विवेकस्य बलवतो यमादीन् अमात्यान् पश्यसि न एते नियतमस्माभिरभियुक्तमात्राद्रागेव विघटिष्यन्ते । तथा हि

अहिंसा कैव कोपस्य ब्रह्मचर्यादयो मम ।
लोभस्य पुरतः के ऽमी सत्यास्तेयापरिग्रहाः ॥ १५ ॥

यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयस्तु निर्विकारैकचित्तसाध्यत्वादीषत्करसमुन्मूलना एव । अपि च स्त्रिय एवामीषां कृत्यास्तेनैते ऽस्मद्गोचरा एव वर्तन्ते । यतः

*) आर्यपुत्र एवमेतत् । तथापि महासहायसंपन्नः प्रातिकूल्यो ऽरातिः । यतो ऽस्य यमनियमप्रमुखा अमात्या महाबलाः श्रूयन्ते ।

सन्तु विलोकनभाषणविलासपरिहासकेलिपरिरम्भाः ।
स्मरणमपि कामिनीनामलमिह मनसो विकाराय ॥ १६ ॥

विशेषतश्चैते मदमात्सर्यदम्भादिभिरस्मत्स्वामिवल्लभैरभिगुह्यमाना नरपतिमन्त्रिणामधर्ममेवाश्रयिष्यन्ति ।

रतिः ॥ अज्जउत्त सुदं मए तुम्हाणं समदमविवेअप्पहुदीणं च एक्कं उप्पत्तित्थाणं त्ति । *)

कामः ॥ आः प्रिये किमुच्यते एकमुत्पत्तिस्थानमिति । ननु जनक एवास्माकमभिन्नः । तथा हि

संभूतः प्रथममिहेश्वरस्य संगान्-
मायायां मन इति विश्रुतस्तनूजः ।
त्रैलोक्यं सकलमिदं विसृज्य भूयस्
तेनाथो जनितमिदं कुलद्वयं नः ॥ १७ ॥

तस्य च प्रवृत्तिनिवृत्ती द्वे धर्मपत्न्यौ । तयोः प्रवृत्त्यामुत्पन्नं महामोहप्रधानमेकं कुलं निवृत्त्यां च द्वितीयं विवेकप्रधानमिति ।

रतिः ॥ अज्जउत्त जइ एव्वं ता किं णिमित्तं तुम्हाणं सोअराणं वि परोप्परं एआरिसं वेरं । **)

कामः ॥ प्रिये

*) आर्यपुत्र श्रुतं मया युष्माकं शमदमविवेकप्रभृतीनां चैकमुत्पत्तिस्थानमिति ।

**) आर्यपुत्र यद्येवं तत् किं निमित्तं युष्माकं सोदराणामपि परस्परमेतादृशं वैरं ।

एकामिषप्रभवमेव सहोदराणां
उज्जृम्भते जगति वैरमिति प्रसिद्धं ।
पृथ्वीनिमित्तमभवत् कुरुपाण्डवानां
तीव्रस्तथा हि भुवनत्रयकृद्विरोधः ॥ १८ ॥

सर्वमेवैतज्जगदस्मत्पितोपार्जितं । तच्चास्माभिस्तावद्वल्लभतया सर्वमेवाक्रान्तं तेषां तु विरलः प्रचारः । तेनैते पापाः साम्प्रतं पितरमस्मांश्चोन्मूलयितुमुद्यताः ।

रतिः ॥ सन्तं पावं सन्तं पावं । अज्जउत्त किं एदं पावं विद्देसमत्तकेण तेहिं आरद्धं अद्द वा अत्थि उवाओ को वि एत्थं मन्तिदो । *)

कामः ॥ अस्त्यत्र किंचिन्निगूढं बीजं ।

रतिः ॥ अज्जउत्त ता किं ण उग्घाडीअदि । **)

कामः ॥ स्त्रीस्वभावाद्भवती भीरुरिति न तद्दारुणं पापीयसामुद्घाट्यते ।

रतिः ॥ सभयं ॥ अज्जउत्त केरिशं तं । ***)

*) शान्तं पापं शान्तं पापं । आर्यपुत्र किमिदं पापं विद्वेषमात्रकेण तैरारब्धं अथ वास्त्युपायः को ऽप्यत्र मन्त्रितः ।

**) आर्यपुत्र तत् किं नोद्घाट्यते ।

***) आर्यपुत्र कीदृशं तत् ।

कामः ॥ प्रिये न भेतव्यं न भेतव्यं हृताशानामाशामात्रमेतत् । अस्ति किलैषा किंवदन्ती अत्रास्माकं कुले कालरात्रिकल्पा विद्या नाम राक्षसी समुत्पत्स्यत इति ।

रतिः ॥ सभयं ॥ हद्धी हद्धी कहं अह्माणं कुले रक्खसी त्ति वेवदि मे हिअअं । *)

कामः ॥ प्रिये न भेतव्यं न भेतव्यं किंवदन्तीमात्रमेतत् ।

रतिः ॥ अध ताए रक्खसीए किं कादव्वं । **)

कामः ॥ प्रिये अस्ति किल तत्र प्राजापत्या सरस्वती
पुंसः संगसमुज्झितस्य गृहिणी मायेति तेनाप्यसाव्
अस्पृष्टापि मनः प्रसूय तनयं लोकान् असूत क्रमात् ।
तस्मादेव जनिष्यते पुनरसौ विद्येति कन्या यया
तातस्ते च सहोदराश्च जननी सर्वं च भक्ष्यं कुलं ॥ १९ ॥

रतिः ॥ सत्रासोत्कम्पं ॥ अज्जउत्त परित्ताहि परित्ताहि ***)

॥ इति भर्तारमालिङ्गति ॥

कामः ॥ स्पर्शसुखमभिनीय स्वगतं ॥

स्फुरद्रोमोद्भेदस्तरलतरताराकुलदृशो
भयोत्कम्पोत्तुङ्गस्तनयुगभरासंगसुभगः ।

*) हाधिक् हाधिक् कथमस्माकं कुले राक्षसीति वेपते मे हृदयं ।

**) अथ तया राक्षस्या किं कर्तव्यं ।

***) आर्यपुत्र परित्रायस्व परित्रायस्व ।

अधीराक्ष्या गुञ्जन्मणिवलयदोर्वल्लिरचितः
परीरम्भो मोदं जनयति च संमोहयति च ॥ २० ॥

॥ प्रकाशं दृढं परिष्वज्य ॥ प्रिये न भेतव्यं न भेतव्यं अस्मासु जीवत्सु कुतो विद्योत्पत्तिः ।

रतिः ॥ अध किं ताए रक्खसीए उप्पत्ती तुह्माणं पडिवक्खाणं संमदा । *)

कामः ॥ बाढं । सा खलु विवेकेनोपनिषद्देव्यां प्रबोधचन्द्रेण भ्रात्रा समं जनयितव्या । तत्र सर्व एते शमदमादयः प्रतिपन्नोद्योगाः ।

रतिः ॥ अज्जउत्त कहं एदेहिं अप्पणो विणासकारिणीए विज्जाए उप्पत्ती तेहिं दुव्विणीदेहिं सलाहिज्जदि । **)

कामः ॥ कुलक्षयप्रवृत्तानां पापानां पापकारिणां कुतः प्रत्यवायगणना । पश्य

सहजमलिनवक्रभावभाजां
भवति भवः प्रभवात्मनाशहेतुः ।
जलधरपदवीमवाप्य धूमो
ज्वलनविनाशमनु प्रयाति नाशं ॥ २१ ॥

*) अथ किं तस्या राक्षस्या उत्पत्तिर्युष्माकं प्रतिपक्षाणां संमता ।

**) आर्यपुत्र कथमेतैरात्मनो विनाशकारिण्या विद्याया उत्पत्तिस्तैर्दुर्विनीतैः श्लाघ्यते ।

॥ नेपथ्ये ॥ आः पाप दुरात्मन् कथमस्मान् एव पापकारिण इत्याक्षिपसि । ननु रे

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ २२ ॥

इति पौराणिकीं गाथां पुराणविद उदाहरन्ति । अनेन चास्माकं जनकेनाहंकारानुवर्तिना जगत्पतिस्तावत् पितेव बद्धः । मोहादिभिश्च स एव बन्धः सुदृढतां नीतः ।

कामः ॥ विलोक्य ॥ प्रिये अयमस्माकं कुले ज्यायान् देव्या मत्या सह विवेक इत एवाभिवर्तते । य एषः

रागादिभिः स्वरसचारिभिरात्तकान्तिर्
निर्भर्त्स्यमान इव मानधनः कृशाङ्गः ।
मत्या नितान्तकलुषीकृतया शशाङ्कः
कान्त्येव सान्द्रतुहिनान्तरितो विभाति ॥ २३ ॥

तन्न युक्तमिहास्माकमवस्थातुं ॥ ॥ इति निष्क्रान्तौ ॥

॥ विष्कम्भकः ॥

॥ ततः प्रविशति राजा मतिश्च ॥

राजा ॥ विचिन्त्य ॥ प्रिये श्रुतं त्वयास्य दुर्विनीतस्य वटोर्मदविस्फुर्जितं वचो यदस्मान् एव पापकारिण इत्याक्षिपति ।

मतिः ॥ अज्जउत्त किं अप्पणो दोसं लोओ विआणादि । *)

*) आर्यपुत्र किमात्मनो दोषं लोको विजानाति ।

राजा ॥ प्रिये पश्य

असावहंकारपरैर्दुरात्मभिर्
निबध्य तैः पाशशतैर्मदादिभिः ।
चिरं चिदानन्दमयो निरञ्जनो
जगत्प्रभुर्दीनदशामनीयत ॥ २४ ॥

न एते पुण्यकारिणो वयं तन्मुक्तये प्रवृत्ताः पापकारिण इति जितं दुरात्मभिः ।

मतिः ॥ अज्जउत्त जदो सो सहजआनन्दसुन्दरसहाओ णिच्चप्पआसो विप्फुरन्तसअलतिहुअणप्पआरो परमेसुरो सुणीअदि ता कधं एदेहिं दुव्विणीदेहिं बन्धिअ महामोहसाअरे णिक्खित्तो । *)

राजा ॥ प्रिये

सततधृतिरप्युच्चैः शान्तोऽप्यवाप्तमहोदयोऽप्य्
अधिगतनयोऽप्यन्तःस्वस्थोऽप्युदीरितधीरपि ।
त्यजति सहजं धैर्यं स्त्रीभिः प्रतारितमानसः
स्वमपि यदयं मायासंगात् पुमान् इह विस्मृतः ॥ २५ ॥

मतिः ॥ अज्जउत्त णक्खु अन्धआरलेहाए सहस्सरस्सिणो

*) आर्यपुत्र यतोऽसौ सहजानन्दसुन्दरस्वभावो नित्यप्रकाशो विस्फुरत्सकलत्रिभुवनप्रचारः परमेश्वरः श्रूयते तत् कथमेतैर्दुर्विनीतैर्बद्ध्वा महामोहसागरे निक्षिप्तः ।

तिरक्कारो जं माआए तधाप्फुरन्तमहापआससाअरस्स देवस्स वि अहिहवो । *)

राजा ॥ प्रिये अविचारसिद्धेयं वारविलासिनीव माया अस-तोऽपि भावान् उपदर्शयन्ती परपुरुषं वञ्चयति । पश्य

स्फटिकमणिवद्भास्वान् देवः प्रगाढमनार्यया
विकृतिमनया नीतः काममसंगतविक्रियः ।
न खलु तदुपश्लेषादस्य व्यपैति रुचिर्मनाक्
प्रभवति तथाप्येषा वाढं विधातुमधीरतां ॥ २६ ॥

मतिः ॥ किं उण कारणं जेण सा तधाउदारचरिदं दुव्विदद्धा पआरेदि । **)

राजा ॥ न खलु प्रयोजनं कारणं वा विलोक्य माया प्रवर्तते । स्वभावः खल्वयं स्त्रीपिशाचीनां । पश्य

संमोहयन्ति रमयन्ति विषादयन्ति
निर्भर्त्सयन्ति मदयन्ति विडम्बयन्ति ।
एताः प्रविश्य सदयं हृदयं नराणां
किं नाम वामनयना न समाचरन्ति ॥ २७ ॥

*) आर्यपुत्र न खल्वन्धकारलेखया सहस्ररश्मेस्तिरस्कारो यन्मायया तथास्फुरन्महाप्रकाशसागरस्य देवस्याप्यभिभवः ।

**) किं पुनः कारणं येन सा तथोदारचरितं दुर्विदग्धा प्रतारयति ।

अस्ति चापरमपि कारणं ।

मतिः ॥ अज्जउत्त किं तं । *)

राजा ॥ एवमनया दुराचारया चिन्तितं । अहं तावद्गतयौवना वर्षीयसी अयं च पुराणः पुरुषः स्वभावादेव विषयरसविमुखः । ततः स्वतनयमेव पारमेश्वरे पदे निवेशयामि । तमेव च मातुरभिप्रायमासाद्य नितान्तप्रत्यासन्नतया तद्रूपमिवापन्नेन मनसा नवद्वाराणि पुराणि निर्माय

एको ऽपि बहुधा तेषु विच्छिद्येव निवेशितः ।
स्वचेष्टितमथो तस्मिन् विदधाति मणाविव ॥ २८ ॥

मतिः ॥ विचिन्त्य ॥ अज्जउत्त जादिसी मादा पुत्तको वि तादिसो जेव्व जादो । **)

राजा ॥ ततो ऽसावहंकारेण चित्तस्य ज्येष्ठपुत्रेण नाम्रा परिष्वक्तः । ततश्चासावीश्वरः

जातो ऽहं जनको ममैष जननी क्षेत्रं कलत्रं कुलं
पुत्रो मित्रमारातयो वसु बलं विद्या सुहृद्बान्धवाः ।
चित्तस्पन्दितकल्पनामनुपतन् विद्वान् अविद्यामयीं
निद्रामेत्य विघूर्णितो बहुविधान् स्वप्नान् इमान् पश्यति ॥

*) आर्यपुत्र किं तत् ।

**) आर्यपुत्र यादृशी माता पुत्रको ऽपि तादृश एव जातः ।

मतिः ॥ अज्जउत्त एव्वं दीहदीहतरणिद्दाविद्दाविग्रप्पबोहे परमेसरे कधं पबोहोप्पत्ती भविस्सदि । *)

राजा ॥ सलज्जमधोमुखस्तिष्ठति ॥

मतिः ॥ अज्जउत्त किं त्ति गुरुअरलज्जाभरणमिदसेअरो तुण्हीभूदो सि । **)

राजा ॥ प्रिये सेर्ष्यं प्रायेण योषितां भवति हृदयं तेन सापराधमिवात्मानं शङ्के ।

मतिः ॥ अज्जउत्त अणाओ ताओ त्थिआओ जाओ सरसण्णवुत्तस्स धम्माथवावारप्पत्थिदस्स वा भत्तुणो हिअअअच्छिअं विहणन्ति । ***)

राजा ॥ प्रिये

मानिन्याश्चिरविप्रयोगजनितासूयाकुलाया भवेत्
शान्त्यादेरनुकूलनादुपनिषद्देव्या मया संगमः ।
तूष्णीं चेद्विषयान् अपास्य भवती तिष्ठेन्मुहूर्तं ततो
जाग्रत् स्वप्नसुषुप्तिधामविरहात् प्राप्तः प्रबोधोदयः ॥ ३० ॥

*) आर्यपुत्रैवं दीर्घदीर्घतरनिद्राविद्रावितप्रबोधे परमेश्वरे कथं प्रबोधोत्पत्तिर्भविष्यति ।

**) आर्यपुत्र किमिति गुरुतरलज्जाभरनमितशेखरस्तूष्णींभूतो ऽसि ।

***) आर्यपुत्रान्यास्ताः स्त्रियो याः स्वरसप्रवृत्तस्य धर्मार्थव्यापारप्रस्थितस्य वा भर्तुर्हृदयेप्सितं विघ्नन्ति ।

मतिः ॥ अज्जउत्त जइ एव्वं कुलप्पहुणो दिढगण्ठिणिबद्धस्स वि बन्धमोक्खो भोदि तदा ताए णिच्चअणुबन्धो जेव्व अज्जउत्तो भोदु त्ति सुणुदु मे पिअं । *)

राजा ॥ प्रिये यद्येवं प्रसन्नासि सिद्धास्तर्हि चिरकालमस्माकं मनोरथाः । तथा हि

वर्धकी बहुधा विभज्य जगतामादिः प्रभुः शाश्वतः
क्षिप्त्वा यैः पुरुषः पुरेषु परमं मृत्योः पदं प्रापितः ।
तेषां ब्रह्मभिदां विधाय विधिवत् प्राणान्तिकं विद्यया
प्रायश्चित्तमिदं मया पुनरसौ ब्रह्मैकतां नीयते ॥ ३१ ॥

तद्भवतु । प्रस्तुतविधानाय प्रबोधोत्पत्तये शमदमादीन् योजयामः ।

॥ इति निष्क्रान्तौ ॥

॥ इति प्रथमोऽङ्कः ॥

*) आर्यपुत्र यद्येवं कुलप्रभोर्दृढग्रन्थिनिबद्धस्यापि बन्धमोक्षो भवति तदा तया नित्यानुबन्ध एवार्यपुत्रो भवत्विति शृणु मे प्रियं ।

॥ अथ ॥

॥ द्वितीयोऽङ्कः ॥

॥ ततः प्रविशति दम्भः ॥

दम्भः ॥ आदिष्टोऽस्मि महाराजमहामोहेन यथा वत्स दम्भ प्रतिज्ञातं सामात्येन विवेकेन प्रबोधोदयाय प्रेषिताश्च तेषु तेषु तीर्थेषु शमदमादयः । स चायमस्माकमुपस्थितः कुलक्षयो भवद्भिरवहितैः प्रतिकर्तव्यः । तत्र पृथिव्यां परमं मुक्तिक्षेत्रं वाराणसी नाम नगरी । तद्भवांस्तत्र गत्वा चतुर्णामप्याश्रमाणां निःश्रेयसविघ्नार्थं प्रयततामिति । तदिदानीं वशीकृतभूयिष्ठा मया वाराणसी । संपादितश्च स्वामिनो मया यथानिर्दिष्ट आदेशः । तथा हि मदधिष्ठितैरिदानीं

वेश्यावेश्मसु सीधुगन्धिललनावक्त्रासवामोदितैर्
नीत्वा निर्भरमन्मथोत्सवरसैरुन्निद्रचन्द्राः क्षपाः ।
सर्वज्ञा इति दीक्षिता इति चिरप्राप्ताग्निहोत्रा इति
ब्रह्मज्ञा इति तापसा इति दिवा धूर्तैर्जगद्वञ्च्यते ॥ १ ॥

॥ विलोक्य ॥ कोऽप्ययं पान्थो भागीरथीमुत्तीर्य साम्प्रतमित
एवाभिवर्तते । यदेषः

ज्वलन्निवाभिमानेन ग्रसन्निव जगत्त्रयं ।
भर्त्सयन्निव वाग्जालैः प्रज्ञयोपहसन्निव ॥ २ ॥

तथा तर्कयामि । नूनमयं दक्षिणराढाप्रदेशादागतो भविष्य-
ति । तदेतस्मादर्थस्याहंकारस्य वृत्तान्तमनुसरिष्यामीति ।

॥ ततः प्रविशत्यहंकारो यथानिर्दिष्टः ॥

अहंकारः ॥ अहो मूर्खबहुलं जगत् । तथा हि

नैवाश्रावि गुरोर्मतं न विदितं तौतातितं दर्शनं
तत्वं ज्ञातमहो न शालिकगिरां वाचस्पतेः का कथा ।
सूक्तं नापि महोदधेरधिगतं माहाव्रती नेक्षिता
सूक्ष्मा वस्तुविचारणा नृपशुभिः स्वस्थैः कथं स्थीयते ॥ ३ ॥

॥ विलोक्य ॥ एते तावदर्थावधारणविधुराः स्वाध्यायाध्ययनमा-
त्रनिरता वेदविप्लावका एव । ॥ पुनरन्यतो गत्वा ॥ एते च भि-
क्षामात्रगृहीतयतिव्रता मुण्डितमुण्डाः पण्डितंमन्या वेदान्त-
शास्त्रं व्याकुलयन्ति । ॥ विहस्य ॥

प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः ।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते ॥ ४ ॥

तदेतैर्वाङ्मिश्रणमपि गुरुतरदुरितोदयाय । ॥ पुनरन्यतो गत्वा ॥

एते च शैवपाशुपतादयो दुरभ्यस्तालपादमताः पशवः पाखण्डा एव। अमीषां संभाषणादपि नरा नरकं प्रयान्ति। तदेते दर्शनपथाद्दूरं परिहरणीयाः। ॥ पुनरन्यतो गत्वा ॥ एते च

गङ्गातीरतरङ्गशीतलशिलाविन्यस्तभास्वद्वृशी-
संविष्टाः कुशमुष्टिमण्डितमहादण्डाः करण्डोज्ज्वलाः।
पर्यायग्रथिताक्षसूत्रवलयप्रत्येकबीजग्रह-
व्यग्राग्राङ्गुलयो हरन्ति धनिनां वित्तान्यहो दाम्भिकाः॥

॥ पुनरन्यतो गत्वा ॥ एते च त्रिदण्डिव्यपदेशजीविनो द्वैताद्वैतमार्गपरिभ्रष्टाः। ॥ पुनरन्यतो गत्वा। विलोक्य ॥ अये कस्येदं द्वारोपान्तनिखातातिप्रांशुवंशकाण्डताण्डवितधौतसितसूक्ष्माम्बरसमुत्तम्भिततत्तो विन्यस्तकृष्णाजिनदृषदुपलचमसचषालोलूखलमुशलमनवरतकृताज्यगन्धिधूमश्यामलीकृतगगनमण्डलममरसरितो नातिदूरतो विभात्याश्रमपदं। नूनमदः कस्यापि गृहमेधिनो गृहं भविष्यति। भवतु। युक्तमस्माकमतिपवित्रमेतद्धि त्रिदिवसनिवासाय स्थानं। इति प्रवेशं नाटयति ॥ विलोक्य ॥ अये

मृद्बिन्दुलाञ्छितललाटभुजोदरोरः-
कण्ठोष्ठपृष्ठचिबुकोरुकपोलजानुः।
चूडाग्रकर्णकटिपाणिविराजमान-
दर्भाङ्कुरः स्फुरति मूर्त इवैष दम्भः॥ ६॥

भवतु । उपसर्पाम्येनं । ॥ उपसृत्य ॥ कल्याणं भवतां ।

दम्भः ॥ हूंकारेणैव तं वारयति ॥

प्रविश्य बटुः ससंभ्रमं ॥ ब्रह्मन् दूरत एव स्थीयतां । यतः पादौ प्रक्षाल्य एतदाश्रमपदं प्रवेष्टव्यं ।

अहंकारः ॥ सक्रोधं ॥ आः पाप तुरुष्कदेशं प्राप्ताः स्मः । यत्र श्रोत्रियान् अतिथीन् आसनपाद्यादिभिरपि गृहिणो नोपतिष्ठन्ति ।

दम्भः ॥ हस्तसंज्ञया समाश्वासयति ॥

बटुः ॥ एवमाराध्यपादा आज्ञापयन्ति । दूरदेशादागतस्यार्यस्य कुलशीलादिकं न सम्यगस्माकं विदितं ।

अहंकारः ॥ आः कथमस्माकमपि कुलशीलादिकमिदानीं परीक्षितव्यं । श्रूयतां

गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढा पुरी
भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमो नः पिता ।
तत्पुत्राश्च महाकुला न विदिताः कस्यात्र तेषामपि
प्रज्ञाशीलविवेकधैर्यविनयाचारैरहं चोत्तमः ॥ ७ ॥

दम्भः ॥ बटुं पश्यति ॥

बटुः ॥ ताम्रघटीं गृहीत्वा ॥ भगवन् पादशौचं विधीयतां ।

अहंकारः ॥ स्वगतं ॥ भवतु को विरोधः । ॥ प्रकाशं ॥ एवं क्रियते ।

॥ तथा कृत्वोपसर्पति ॥

दम्भः ॥ हस्तान् पीडयित्वा ॥ दूरे तावत् स्थीयतां । वाताहृताः प्रस्वेदकणिकाः प्रसरन्ति ।

अहंकारः ॥ अहो अपूर्वमिदं ब्राह्मण्यं ।

वटुः ॥ ब्रह्मन्नेवमेतत् । तथा हि

अस्पृष्टचरणा ह्यस्य चूडामणिमरीचिभिः ।
नीराजयन्ति भूपालाः पादपीठान्तभूतलं ॥ ८ ॥

अहंकारः ॥ स्वगतं ॥ अये दम्भग्राहो ऽयं देशः । भवत्वस्मिन्नासन उपविशामि । ॥ तथा कर्तुमिच्छति ॥

वटुः ॥ नैवमाराध्यपादानामासनमन्यैराक्रम्यते ।

अहंकारः ॥ आः पाप अस्माभिरपि दक्षिणराढाप्रसिद्धविशुद्धिभिरिदमासनमनाक्रमणीयं । शृणु रे मूर्ख

नास्माकं जननी तथोज्ज्वलकुला सच्छ्रोत्रियाणां पुनर्
व्यूढा काचन कन्यका खलु मया तेनास्मि तातादधिकः ।
अस्मच्छ्यालकमित्रमातुलसुता मिथ्याभिशप्ता यतस्
तत्संपर्कवशान्मया स्वगृहिणी प्रेयस्यपि प्रोज्झिता ॥ ९ ॥

दम्भः ॥ ब्रह्मन् यद्यप्येवं तथाप्यस्माकमविदितवृत्तान्तो भवान् । तथा हि

सदनमुपगतोऽहं पूर्वमम्भोजयोनेः
सपदि मुनिभिरुच्चैरासनेषूज्झितेषु ।
सशपथमनुनीय ब्रह्मणा गोमयाम्भः-
परिमृजितनिजोरावाशु संवेशितोऽस्मि ॥ १० ॥

अहंकारः ॥ स्वगतं ॥ अहो दाम्भिकब्राह्मणस्यात्युक्तिः । ॥ विचिन्त्य ॥ अथ वा दम्भस्यैव भवत्येवं तावत् । ॥ सक्रोधं प्रकाशं ॥ आः किमेवं गर्वायसे ।

अरे क इव वासवः कथय कोऽत्र पद्मोद्भवो
वद प्रभवभूमयो जगति का ऋषीणामपि ।
अवेहि तपसो बलं मम पुरंदराणां शतं
शतं च परमेष्ठिनां पततु वा मुनीनां शतं ॥ ११ ॥

दम्भः ॥ विलोक्य सानन्दं ॥ अये आर्यपितामहोऽस्माकमहंकारः । आर्य दम्भो लोभात्मजोऽहं भो अभिवादये ।

अहंकारः ॥ वत्स आयुष्मान् भव । बालः खल्वसि मया द्वापरान्ते दृष्टः । संप्रति चिरकालविप्रकर्षाद्वार्धकग्रस्ततया च न सम्यक् प्रत्यभिजानामि । अथ त्वत्कुमारस्यानृतस्य कुशलं ।

दम्भः ॥ न हि तेन विना मुहूर्तमप्यहं जीवामि । अथ किं सोऽप्यत्रैव महामोहस्याज्ञया वर्तते ।

अहंकारः ॥ अथ तव मातापितरौ तृष्णालोभावपि कुशलौ ।

दम्भः ॥ तावप्यत्रैव वर्तेते । तयोर्विना क्षणमपि न तिष्ठामि । आर्यमिश्रैः पुनरत्र केन प्रयोजनेन प्रसादः कृतः ।

अहंकारः ॥ वत्स मया महामोहस्य विवेकसकाशादत्याहितं श्रुतं । तेन तद्वृत्तान्तं प्रत्येतुमागतोऽस्मि ।

दम्भः ॥ तर्हि स्वागतमेवार्यस्य यतो महाराजस्यापीन्द्रलोकादागमनं श्रूयते । अस्ति च किंवदन्ती यद्देवेन वाराणसी नाम नगरी राजधानी निरूपितेति ।

अहंकारः ॥ किं पुनः कारणं वाराणस्यां सर्वात्मना महामोहस्यावस्थाने ।

दम्भः ॥ आर्य ननु विवेकोपरोध एव । तथा हि

विद्याप्रबोधोदयजन्मभूमिर्वाराणसी ब्रह्मपुरी निरत्यया ।
अतः कुलोच्छेदविधिं विधित्सुर्निवस्तुमत्रेच्छति नित्यमेव ॥

अहंकारः ॥ सभयं ॥ यद्येवमशक्यप्रतीकार एवायमर्थः । यतः

परममविद्रुपां पदं नराणां
पुरविजयी करुणाविधेयचेताः ।
कथयति भगवान् इहान्तकाले
भवभयकातरतारकं प्रबोधं ॥ १३ ॥

दम्भः ॥ सत्यमेतत् तथापि नैतत् कामक्रोधाद्यभिभूतानां संभाव्यते । तथाप्युदाहरन्ति तैर्थिकाः

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतं ।
विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ १४ ॥

॥ नेपथ्ये ॥ भो भो जना एष खलु संप्राप्तो देवो महामोहः । तेन

निष्यन्दैश्चन्दनानां स्फटिकमणिशिलावेदिकाः संस्क्रियन्तां
मोच्यन्तां यन्त्रमार्गाः प्रसरतु परितो वारिधारा गृहेषु ।
उच्छ्रीयन्तां समन्तात् स्फुरदुरुमणयः श्रेणयस्तोरणानां
धूयन्तां सौधमूर्धस्वमरपतिधनुर्धामचित्राः पताकाः ॥ १५ ॥

दम्भः ॥ आर्य प्रत्यासन्नो महाराजः । तत् प्रत्युद्गमनेन संभाव्यतामार्येण ।

अहंकारः ॥ एवं भवतु ।

॥ इति निष्क्रान्तौ ॥

॥ प्रवेशकः ॥

॥ ततः प्रविशति महामोहो विभवतश्च परिवारः ॥

महामोहः ॥ विहस्य ॥ अहो निरङ्कुशा जडधियः । तथा हि

आत्मास्ति देहाद्व्यतिरिक्तमूर्तिर्
भोक्ता स लोकान्तरितः फलानां ।
आशेयमाकाशतरोः प्रसूनात्
प्रथीयसी स्वादुफलप्रसूतौ ॥ १६ ॥

इदं च स्वकपोलकल्पना विनिर्मितपदार्थावस्तम्भेन जगदेतै- र्दुर्विदग्धैर्वञ्च्यते । तथा हि

यन्नास्त्येव तदस्ति वस्त्विति मृषाजल्पद्भिरेवास्तिकैर्
वाचालैर्बहुभिस्तु सत्यवचसो निन्द्याः कृता नास्तिकाः ।
हंहो पश्यत तत्त्वतो यदि पुनः छिन्नादतो वर्ष्मणो
दृष्टः किं परिणामरूपितचितिर्जीवः पृथक् कैरपि ॥ १७ ॥

अपि च न केवलं जगदात्मैव तावदमीभिर्वञ्च्यते । तथा हि

तुल्यत्वे वपुषां मुखाद्यवयवैर्वर्णक्रमः कीदृशः
स्त्री चेयं वसु वा परस्य यदमुं भेदं न विद्मो वयं ।
हिंसायामथ वा यथेष्टगमने स्त्रीणां परस्वग्रहे
कार्याकार्यकथास्तथापि यदमी निःपौरुषाः कुर्वते ॥१८॥

॥ विचिन्त्य सश्लाघं ॥ सर्वथा लोकायतमेव शास्त्रं । यत्र प्रत्यक्षमेव प्रमाणं । पृथिव्यप्तेजोवायवस्तत्त्वानि । अर्थकामौ पुरुषार्थौ

भूतान्येव चेतयन्ते । नास्ति परलोकः । मृत्युरेवापवर्ग इति । तदेतदस्मदभिप्रायानुरोधिना वाचस्पतिना प्रणीय चार्वाकाय समर्पितमासीत् । तेन च शिष्योपशिष्यद्वारेणास्मिन् लोके बहुलीकृतं तन्त्रं ।

॥ ततः प्रविशति चार्वाकः शिष्यश्च ॥

चार्वाकः ॥ वत्स जानासि दण्डनीतिरेव विद्या । अत्रैव वार्तान्तर्भवति । धूर्तप्रलापस्त्रयी । पश्य

स्वर्गः कर्तृक्रियाद्रव्यविनाशे यदि यज्वनां ।
ततो दावाग्निदग्धानां फलं स्याद्भूरि भूरुहां ॥ १९ ॥
निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते ।
स्वपिता यजमानेन किं न तस्मान्निहन्यते ॥ २० ॥

अपि च । मृतानामपि जन्तूनां श्राद्धं चेत् तृप्तिकारणं ।
निर्वाणस्य प्रदीपस्य स्नेहः संवर्धयेच्छिखां ॥२१॥

शिष्यः ॥ आचालिअ जइ एसो जेव्व पलमत्थो पुलिसस्स जं खज्जइ पिज्जइ ता किं त्ति एदेहिं तित्थिएहिं संसालसोक्खं पलिहलिअ आपा घोलघोलेहिं पलाअसान्तअणसट्ठ-आलपहुदिहिं दुक्खेहिं खविज्जदि । *)

*) आचार्य यद्येष एव परमार्थः पुरुषस्य यत् खाद्यते पीयते तत् किमित्येतैस्तैर्थिकैः संसारसौख्यं परिहृत्यात्मा घोरघोरैः पराकसान्तपनषष्ठकालप्रभृतिभिर्दुःखैः खेद्यते ।

चार्वाकः ॥ वत्स धूर्तप्रणीतागमप्रतारितानामाशामोदकैरियं तृप्तिर्मूर्खाणां । पश्य

क्वालिङ्गनं भुजनिपीडितबाहुमूल-
भग्नोन्नतस्तनमनोहरमायताक्ष्याः ।
भिक्षोपवासनियमार्कमरीचिदाहैर्
देहोपशोषणविधिः कुधियां क्व चैषः ॥ २२ ॥

शिष्यः ॥ आचालिअ एव्वं खु तित्थिआ आलवन्ति जं दुक्खमिस्सिदं संसालसुखं पलिहलणिज्जं त्ति । *)

चार्वाकः ॥ विहस्य ॥ आः दुर्बुद्धिविलसितं नरपशूनां ।

त्याज्यं सुखं विषयसंगमजन्म पुंसां
दुःखोपसृष्टमिति मूर्खविचारणैषा ।
व्रीहीन् जिहासति सितोत्तमतण्डुलाढ्यान्
को नाम भोस्तुषकणोपहितान् हितार्थी ॥ २३ ॥

महामोहः ॥ अये चिरेण खलु प्रमाणवन्ति वचनानि कर्णसुखमुपजनयन्ति । ॥ विलोक्य सानन्दं ॥ हन्त प्रियसुहृन्मे चार्वाकः ।

चार्वाकः ॥ विलोक्य ॥ एष महाराजमहामोहः ॥ उपसृत्य ॥ जयतु जयतु महाराजः । एष चार्वाकः प्रणमति ।

*) आचार्य एवं खलु तैर्थिका आलपन्ति यद् दुःखमिश्रितं संसारसुखं परिहरणीयमिति ।

महामोहः ॥ चार्वाक स्वागतं । भो इहोपविश्यतां ।

चार्वाकः ॥ उपविश्य ॥ एष कलेः साष्टाङ्गः प्रणामः ।

महामोहः ॥ अथ कलेर्भद्रमव्याहतं ।

चार्वाकः ॥ देवस्य प्रसादात् सर्वत्र भद्रं । निर्वर्तितकर्तव्यशेषश्च देवपादमूलं द्रष्टुमिच्छति । यतः

आज्ञामवाप्य महतीं द्विषतां निपाते
निर्वर्त्य तां सपदि लब्धमुखप्रसादः ।
उच्चैःप्रमोदमनुमोदितदर्शनः सन्
धन्यो नमस्यति पदाम्बुरुहं प्रभूणां ॥ २४ ॥

महामोहः ॥ अथ तस्मिन् कलौ कियत् संपन्नं ।

चार्वाकः ॥ देव

व्यतीतवेदार्थपथः प्रथीयसीं यथेष्टचेष्टां गमितो महाजनः ।
तदत्र हेतुर्न कलिर्न चाप्यहं प्रभुप्रसादो हि तनोति पौरुषं ॥

तत्रोत्तरपथिकाः पाश्चात्याश्च त्रयीमिव त्याजिताः शमदमादीनां केव कथा । अन्यत्रापि प्रायशो जीविकामात्रफलैव त्रयी । यथाहाचार्यः

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनं ।
प्रज्ञापौरुषहीनानां जीविकेति वृहस्पतिः ॥ २६ ॥

तेन कुरुक्षेत्रादिषु तावद्देवेन स्वप्नेऽपि विद्याप्रबोधोदयो न शङ्कनीयः ।

महामोहः ॥ साधु संपादितं महत् खलु तत्तीर्थं व्यर्थीकृतं ।

चार्वाकः ॥ देवान्यच्च विज्ञाप्यमस्ति ।

महामोहः ॥ किं तत् ।

चार्वाकः ॥ अस्ति विष्णुभक्तिर्नाम महाप्रभावा योगिनी । सा तु कलिना यद्यपि विरलप्रचारा कृता तथापि तदनुगृहीतान्वयमालोकयितुमपि न प्रभवामः । तदत्र देवेनावधातव्यमिति ।

महामोहः ॥ सभयमात्मगतं ॥ आः प्रसिद्धमहाप्रभावा सा योगिनी स्वभावाद्विद्वेषिणी चास्माकं दुरुच्छेद्या । भवतु । ॥ प्रकाशं ॥ भद्र । अलमनया शङ्कया । कामक्रोधादिप्रतिपक्षेषु कुत्रेयमुदेष्यति ।

चार्वाकः ॥ तथापि लघीयस्यपि रिपौ नानवहितेन जिगीषुणा भवितव्यं । यतः

विपाकदारुणो राज्ञां रिपुरल्पोऽप्यरुंतुदः ।
उद्वेजयति सूक्ष्मोऽपि चरणं कण्टकाङ्कुरः ॥ २७ ॥

महामोहः ॥ नेपथ्याभिमुखं विलोक्य ॥ कः कोऽत्र भोः ।

प्रविश्य दौवारिकः ॥ आज्ञापयतु देवः ।

महामोहः ॥ भो असत्संग आदिश्यन्तां कामक्रोधलोभमद-मानमात्सर्यादयो यथा योगिनी विष्णुभक्तिर्भवद्भिरेवावहितै-र्विहन्तव्येति ।

दौवारिकः ॥ यदाज्ञापयति देवः । ॥ इति निष्क्रान्तः ॥

॥ ततः प्रविशति पत्रहस्तपुरुषः ॥

पुरुषः ॥ हग्गे उक्कलदेशादो आगदो म्हि । अत्थि तत्थ साअलतीलसण्णिवेसे पुलिसोत्तमसण्णिअं देवदाअदणं । तस्सिं महमाणेहिं भट्टकेहिं महालाजसआसं पेसिदो म्हि ॥ ॥ विलोक्य ॥ एसा वाराणसी । एदं लाजउलं । जाव पवि-सामि ॥ प्रविश्य ॥ एसे भट्टके चावाकेण सह्नं किं वि मन्तअं चिट्ठदि । ता उपसप्पामि णं ॥ उपसृत्य ॥ जेदु जेदु भट्टके । एदं पत्तं णिलूपमाणं पेक्खेदु भट्टकेहिं । *)

महामोहः ॥ पत्रं गृहीत्वा ॥ कुतो भवान्

पुरुषः ॥ हग्गे पुलिसोत्तमादो आगदो म्हि **) ।

*) अहमुत्कलदेशादागतोऽस्मि । अस्ति तत्र सागरतीरसंनिवेशे पुरुषोत्तमसंज्ञितं देवता-यतनं । तस्मिन् महमानाभ्यां भट्टारकाभ्यां महाराजसकाशं प्रेषितोऽस्मि । एषा वाराणसी । इदं राजकुलं । यावत् प्रविशामि । एष भट्टारकश्चार्वाकेण सार्धं किमिति मन्त्रयंस्तिष्ठति । तदुपसर्पाम्येनं । जयतु जयतु भट्टारकः । एतत् पत्रं निरूप्यमाणं प्रेक्ष्यतां भट्टारकैः ।

**) अहं पुरुषोत्तमादागतोऽस्मि ।

महामोहः ॥ स्वगतं ॥ कार्यमत्याहितं भविष्यति ॥ प्रकाशं ॥ चार्वाक गछ कर्तव्येष्ववहितेन भवता भवितव्यं ।

चार्वाकः ॥ यदाज्ञापयति देवः । ॥ इति निष्क्रान्तः ॥

महामोहः ॥ पत्रं वाचयति ॥ स्वस्ति श्रीवाराणस्यां महाराजाधिराजपरमेश्वरमहामोहपादान् पुरुषोत्तमायतनान्मदमानौ साष्टाङ्गपातं प्रणम्य विज्ञापयतः । यथा भद्रमत्याहितं । अन्यच्च । देवी शान्तिर्मात्रा श्रद्धया सह विवेकस्य दौत्यमापन्ना विवेकसंगमाय देवीमुपनिषदमहर्निशं प्रबोधयति । अपि च । कामसहचरोऽपि धर्मो वैराग्यादिभिरुपजाप्त इव लक्ष्यते । यतः । कामादिहिम्य क्वाचिन्निगूढः प्रचरति । तदेतज्ज्ञात्वा देवः प्रमाणमिति ॥ पत्रं वाचयित्वा सक्रोधं ॥ आः किमेवमतिमुग्धाः शान्तेरपि बिभ्यति । कुतोऽस्याः संभवः । तथा हि

धाता विश्वविसृष्टिमात्रनिरतो देवोऽपि गौरीभुजा-
श्लेषानन्दविघूर्णमाननयनो दक्षाधरध्वंसनः ।
दैत्यारिः कमलाकपोलमकरीलेखाङ्कितोरःस्थलः
शेतेऽब्धाविति रेषु जन्तुषु पुनः का नाम शान्तेः कथा ॥२८॥

॥ पुरुषं प्रति ॥ जाल्म गछ कामं सत्वरमुपेत्यादेशमस्माकं प्रति-

पादय । यथा दुराशयो धर्म इत्यस्माभिरवगतं । तदस्मिन् मुहूर्तमपि न विश्वसितव्यं दृढं बद्धा धारयितव्य इति ।

पुरुषः ॥ जं देवे आणवेदि । *)

॥ इति निष्क्रान्तः ॥

महामोहः ॥ स्वगतं विचिन्त्य ॥ शान्तेः को ऽभ्युपायः ॥ अथवालमुपायान्तरेण क्रोधलोभावेव तावदत्र पर्याप्तौ ।

॥ प्रकाशं ॥ कः को ऽत्र भोः ।

॥ प्रविश्य दौवारिकः ॥ आज्ञापयतु देवः ।

महामोहः । तावदाहूयतां क्रोधो लोभश्च ।

दौवारिकः ॥ यदादिशति देवः ।

॥ इति निष्क्रान्तः ॥

॥ ततः प्रविशति क्रोधो लोभश्च ॥

क्रोधः ॥ श्रुतं मया यथा शान्तिश्रद्धाविष्णुभक्तयो महाराजेन प्रतिपक्षभावमाचरन्तीति । अहो मयि जीवति कथमासामात्मनिरपेक्षितं चेष्टितं । तथा हि

अन्धीकरोमि भुवनं बधिरीकरोमि
धीरं सचेतनमचेतनतां नयामि ।
कृत्यं न पश्यति न येन हितं शृणोति
धीमान् अधीतमपि न प्रतिसंदधाति ॥ २१ ॥

*) यद्देव आज्ञापयति ।

लोभः ॥ अरे मदुपगृहीता मनोरथसरित्परंपरामेत्र तावन्न तरिष्यन्ति । किं पुनः शान्त्यादींश्चिन्तयिष्यन्ति । पश्य सखे

सन्त्येते मम दन्तिनो मदजलप्रक्षालनगण्डस्थला
वातव्यायतपातिनश्च तुरगा भूयोऽपि लप्स्ये परान् ।
एतल्लब्धमिदं लभे पुनरिदं लब्धादिकं ध्यायतां
चिन्ताजर्जरचेतसां बत नृणां का नाम शान्तिः कथा ॥ ३० ॥

क्रोधः ॥ सखे विदितस्त्वया मत्प्रभावः ।

त्वाष्ट्रं पुत्रमपातयत् सुरपतिश्चन्द्रार्धचूडोऽछिनद्
देवो ब्रह्मशिरो वशिष्ठतनयान् आघातयत् कौशिकः ।
विद्यावन्त्यपि कीर्तिमन्त्यपि सदाचारावदातान्यपि
प्रोच्चैःपौरुषभूषणान्यपि कुलान्युद्धर्तुमीशः क्षणात् ॥ ३१ ॥

लोभः ॥ तृष्णे इतस्तावत् ।

प्रविश्य तृष्णा ॥ किं आणवेदि अज्जउत्तो । *)

लोभः ॥ प्रिये श्रूयतां

क्षेत्रग्रामवनाद्रिपत्तनपुरीद्वीपक्षमामण्डल-
प्रत्याशाघनसूत्रबद्धमनसां लब्धाधिकं ध्यायतां ।
तृष्णे देवि यदि प्रसीदसि तनोष्यङ्गानि तुङ्गानि चेत्
तद्भोः प्राणभृतां कुतः शमकथा ब्रह्माण्डलक्षैरपि ॥ ३२ ॥

*) किमाज्ञापयत्यार्यपुत्रः ।

तृष्णा ॥ अज्जउत्त सग्रं जेव्व दाव अहं एदस्सिं अत्थे णिच्चं अहिजुत्ता संपदं अज्जउत्तस्स आणाए बम्हण्डकोडिहिं वि ण मे उअरं पूरइस्सदि । *)

क्रोधः ॥ हिंसे इत आगम्यतां ।

प्रविश्य हिंसा ॥ एसम्हि आणवेदु अज्जउत्तो । **)

क्रोधः ॥ प्रिये त्वया सह धर्मचारिण्या मातृपितृवधो ममेपत्कर एव । तथा हि

केयं माता पिशाची क इव च जनको भ्रातरः केऽत्र कीटा
वध्योऽयं बन्धुवर्गः कुटिलविटसुहृच्चेष्टिता ज्ञातयोऽमी ।

॥ हस्तौ निष्पीड्य ॥

आगर्भं यावदेषां कुलमिदमखिलं नैव निःशेषयामि
स्फूर्जन्तः क्रोधवह्नेर्न दधति विरतिं तावदङ्गे स्फुलिङ्गाः ॥

॥ विलोक्य ॥ एष स्वामी । तदुपसर्पामः ।

॥ उपसृत्य सर्वे ॥ जयतु जयतु देवः ।

महामोहः ॥ श्रद्धायास्तनया शान्तिरस्मद्द्वेषिणी सा भवद्भिर्ग्राह्येति ।

*) आर्यपुत्र स्वयमेव तावदहमेतस्मिन्नर्थे नित्यमभियुक्ता साम्प्रतमार्यपुत्रस्याज्ञया ब्रह्माण्डकोटिभिरपि न मे उदरं पूरयिष्यते ।

**) एषास्मि आज्ञापयत्वार्यपुत्रः ।

सर्वे ॥ यदादिशति देवः ।

॥ इति निष्क्रान्ताः ॥

महामोहः ॥ श्रद्धायास्तनयेत्युपनिषदोपायान्तरमपि हृदयमारूढं । तथा हि शान्तेर्माता श्रद्धा सा च परतन्त्रा । तत् केनाप्युपायेनोपनिषत्सकाशात् तावच्छ्रद्धापकर्षणं कर्तव्यं । ततो मातृवियोगदुःखादतिमृदुलतया शान्तिरुपरता भविष्यति । अवसीदन्ती च विनश्यति । श्रद्धां व्याक्रष्टुं मिथ्यादृष्टिरेव विलासिनी परं प्रगल्भेति । तदस्मिन् विषये सैव नियोज्यतां ॥ पार्श्वतो विलोक्य ॥ विभ्रमवति सत्वरमाहूयतां मिथ्यादृष्टिः ।

विभ्रमवती ॥ जं देवो आणवेदि । *)

॥ इति निष्क्रम्य मिथ्यादृष्ट्या सह प्रविशति ॥

मिथ्यादृष्टिः ॥ सहि चिरदिट्ठस्स महाराअस्स कहं मुहं पेक्खिस्सं ण खु मं महाराओ उवालहिस्सदि । **)

विभ्रमवती ॥ सहि तुअ मुहदंसणेण अप्पाणं जेव्व महाराओ ण वेदिस्सदि कुदो उवालहिस्सदि । ***)

मिथ्यादृष्टिः ॥ सहि किं मं अलीअं सोहग्गं संभाविअ विलम्बेसि । †)

*) यद्देव आज्ञापयति ।

**) सखि चिरदृष्टस्य महाराजस्य कथं मुखं प्रेक्षिष्ये न खलु मां महाराज उपालप्स्यति ।

***) सखि तव मुखदर्शनेनात्मानमेव महाराजो न वेत्स्यते कुत उपालप्स्यति ।

†) सखि किं मामलीकं सौभाग्यं संभाव्य विडम्बयसि ।

विभ्रमवती ॥ सहि संपदं जेव्व पेक्खिस्सं अलिअत्तणं सोहग्गस्स । अण्णं च । णिद्दाघूणाउलं पिअसहीए लोअणं पेक्खेमि । ता किं खु पिअसहीए लोअणस्स विणिद्ददाए कारणं । *)

मिथ्यादृष्टिः ॥ सहि एक्कवल्लहा वि जा इत्थिआ भोदि ताए वि णिद्दा दुल्लहा किं उण अम्हाणं सअललोअवल्लहाणं । **)

विभ्रमवती ॥ के के उण पिअसहीए वल्लहा । ***)

मिथ्यादृष्टिः ॥ महाराअ अदो उवरि कामो कोहो लोहो अहंआरो त्ति । अह वा अलं विसेसेण । एत्थ कुले जो जादो ण मए विणा वालो त्थविरो जुवाणो वा हिअअणिहिदए रत्तिदिणाइं अहिरमदि । †)

विभ्रमवती ॥ णं एत्थं कामस्स रदी कोहस्स हिंसा लो-

*) सखि साम्प्रतमेव प्रेक्षिष्येऽलीकत्वं सौभाग्यस्य । अन्यच्च । निद्राघूर्णाकुलं प्रियसख्या लोचनं प्रेक्षयामि । तत् किं खलु प्रियसख्या लोचनस्य विनिद्रतायाः कारणं ।

**) सखि एकवल्लभापि या स्त्री भवति तस्या अपि निद्रा दुर्लभा किं पुनरस्माकं सकललोकवल्लभानां ।

***) के के पुनः प्रियसख्या वल्लभाः ।

†) महाराज अत उपरि कामः क्रोधो लोभोऽहंकार इति । अथ वालं विशेषेण । अत्र कुले यो जातो न मया विना बालः स्थविरो युवा वा हृदयनिहितया रात्रिदिनान्यभिरमते ।

हस्स तिण्हा परमपिआ । त्ति सुणीअन्दि ताणं कहं जं पिअदमं णिच्चं रमन्दी इस्सं ण जणेसि । *)

मिथ्यादिष्टिः ॥ सहि इस्स त्ति किं भणीअदि ण ता वि मए विणा मुहुत्तं वि चिठ्ठन्ति । **)

विभ्रमवती ॥ सहि अदो जेव्व भणामि तुह सरिसी सुहगा इत्थिआ पुहवीए णत्थि जाए सोहग्गमहड्ढिविहुरिदहिअआ सवत्तीओ पसाअं पडीच्छन्ति । सहि. अण्णच भणामि । एव्वं णिद्दाउलहिअआ विसंठुलक्खलन्तचलणणेउलझंकालमुहलाए गदीए महाराअं संभावअन्दी सङ्किदहिअअं करिस्सदि पिअसही त्ति तक्केमि । ***)

मिथ्यादृष्टिः ॥ किं एत्थं सङ्किदव्वं । णं अम्हाणं महाराअणिउत्ताणं जेव्व एसो अविणओ । अवि अ । सहीदंसणमत्तपसण्णाणं पुरिसाणं केरिसं भअं । †)

*) नन्विह पापस्य रतिः क्रोधस्य हिंसा लोभस्य तृष्णा परमप्रिया । इति श्रूयन्ते तासां कथं यत् प्रियतमं नित्यं रमयन्ती ईर्ष्यां न जनयसि ।

**) सखि ईर्ष्येति किं भण्यते न ता अपि मया विना मुहूर्तमपि तिष्ठन्ति ।

***) सखि अत एव भणामि तव सदृशी सुभगा स्त्री पृथिव्यां नास्ति यस्याः सौभाग्यमहर्द्धिविधुरितहृदयाः सपत्न्यः प्रसादं प्रतीच्छन्ति । सखि अन्यच्च भणामि । एवं निद्राकुलहृदया विसंष्ठुलस्खलच्चरणनूपुरझंकारमुखरया गत्या महाराजं संभावयन्ती शङ्कितहृदयं करिष्यति प्रियसखीति तर्कयामि ।

†) किमत्र शङ्कितव्यं । नन्वस्माकं महाराजनियुक्तानामेवैष अविनयः । अपि च । सखीदर्शनमात्रप्रसन्नानां पुरुषाणां कीदृशं भयं ।

महामोहः ॥ विलोक्य ॥ अये संप्राप्तैव प्रिया मिथ्यादृष्टिः । या एषा

श्रोणीभारभरालसादरगलन्माल्योपवृत्तिच्छलात्-
लीलोत्क्षिप्तभुजोपदर्शितकुचोन्मीलन्नखाङ्कावलिः ।
नीलेन्दीवरदामदीर्घतरया दृष्ट्या धयन्ती मनो
दोलान्दोलनलोलकङ्कणरणत्कारोत्तरं सर्पति ॥ ३४ ॥

विभ्रमवती ॥ एसो महाराओ उवसप्पदु पिअसही । *)

मिथ्यादृष्टिः ॥ उपसृत्य ॥ जअदु जअदु महाराओ । **)

महामोहः ॥ प्रिये

दलितकुचनखाङ्कमङ्कपालीं
रचय ममाङ्कमुपेत्य पीवरोरु ।
अनुहर हरिणाक्षि शङ्कराङ्क-
स्थितहिमशैलसुताविलासलक्ष्मीं ॥ ३५ ॥

मिथ्यादृष्टिः ॥ सस्मितं तथा करोति ॥

महामोहः ॥ आलिङ्गनसुखमभिनीय ॥ अहो प्रियायाः परिष्वङ्गात् परावृत्तं नवयौवनं ।

*) एष महाराज उपसर्पतु प्रियसखी ।

**) जयतु जयतु महाराजः ।

यः प्रागासीदभिनववयोविभ्रमावाप्तजन्मा
चित्तोन्माथी विगतविषयोपप्लवानन्दसान्द्रः ।
वृत्तीरन्तस्तिरयति तवाश्लेषजन्मा स कोऽपि
प्रौढप्रेमा नव इव पुनर्मान्मथो मे विकारः ॥ ३६ ॥

मिथ्यादृष्टिः ॥ महाराश्र अहं वि संपदं णवजोवणा विश्र संवुत्ता ण खु भावाणुबद्धं पेम कालेणावि विलीअदि । आणावेदु भट्टा किं णिमित्तं भट्टिणा सुमरिदम्हि । *)

महामोहः ॥ प्रिये
स्मर्यते स हि वामोरु यो भवेद्धृदयाद्बहिः ।
मच्चित्तभित्तौ भवती शालभञ्जीव राजते ॥ ३७ ॥

मिथ्यादृष्टिः ॥ महापसादो तधावि आणवेदु महाराओ । **)

महामोहः ॥ यथैव प्रकाशितैरङ्गैः सर्वत्र विचरसि तथैव प्रवर्तितव्यं । अन्यच्च । दास्याः पुत्री श्रद्धा विवेकेन सहोपनिषदं योजयितुं कुट्टिनीभावमापन्ना ।
अतः
प्रतिकूलामकुलजां पापां पापानुवर्तिनीं ।
केशेष्वाकृष्य तां रण्डां पाखण्डेषु नियोजय ॥ ३८ ॥

*) महाराजाहमपि साम्प्रतं नवयौवनेव संवृत्ता न खलु भावानुबद्धं प्रेम कालेनापि विलीयते । आज्ञापयतु भट्टारकः किं निमित्तं भट्टारकेण स्मारितास्मि ।

**) महाप्रसादस्तथाप्याज्ञापयतु महाराजः ।

मिथ्यादृष्टिः ॥ एदाव मत्तके वि विसए अलं भट्टिणो अहिणिवेसेण । वअणमत्तकेण भट्टिणो दासी सद्धा आणं करिस्सदि । स खु मए मित्था धम्मो मित्था मोक्खो मित्था वेअमग्गो मित्था सुहविग्घअराइं मित्था सत्थप्पलविदाइं मित्था सग्गफलविज्जेत्ति भणिज्जन्दी वेअमग्गं जेव्व पलिहलिस्सदि किं उण उवणिसदं । अवि अ । विसआणन्दविमुक्के मोक्खे दोसाणी दंसअन्दीए उवणिसदो वि विरत्ता करइस्सदि अचिरं मए सद्धा । *)

महामोहः ॥ यद्येवं सुष्ठु मे प्रियं संपादितं प्रियया ॥ पुनरालिङ्ग्य चुम्बति ॥

मिथ्यादृष्टिः ॥ भट्टिणा पआसे वि प्पवुत्ते ण लज्जेमि । **)

महामोहः ॥ तद्भवतु । वासागारमेव प्रविशावः ।

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति ॥

॥ द्वितीयोऽङ्कः ॥

*) एतावन्मात्रकेऽपि विषयेऽलं भर्तुरभिनिवेशेन । वचनमात्रकेणैव भर्तुर्दासी श्रद्धाज्ञां करिष्यति । सा खलु मया मिथ्या धर्मो मिथ्या मोक्षो मिथ्या वेदमार्गो मिथ्या सुखविघ्नकराणि मिथ्या शास्त्रप्रलपितानि मिथ्या स्वर्गफलविशेषेति भण्यमाना वेदमार्गमेव परिहरिष्यति किं पुनरुपनिषदं । अपि च । विषयानन्दविमुक्ते मोक्षे दोषान् दर्शयन्त्योपनिषदोऽपि विरक्ता करिष्यतेऽचिरं मया श्रद्धा ।

**) भर्त्रा प्रकाशेऽपि प्रवृत्ते न लज्जामि ।

॥ अथ ॥

॥ तृतीयोऽङ्कः ॥

॥ ततः प्रविशति शान्तिः करुणा च ॥

शान्तिः ॥ सास्रं ॥ मातर्मातः क्वासि देहि मे प्रियदर्शनं । ततः

मुक्तातङ्ककुरङ्गकाननभुवः शैलाः स्खलद्वारयः
पुण्यान्यायतनानि संतततपोनिष्ठांश्च वैखानसाः ।
यस्याः प्रीतिरमीषु सात्रभवती चाण्डालवेश्मोदरं
प्राप्ता गौः कपिलेव जीवति कथं पाखण्डहस्तं गता ॥१॥

अथवा अलं जीवितसंभावनया । यतः

मामनालोक्य न स्नाति न भुङ्क्ते न पिबत्यपः ।
न मया रहिता श्रद्धा मुहूर्तमपि जीवति ॥२॥

तद्विना श्रद्धया मुहूर्तमपि शान्तेर्जीवनं विडम्बनमेव । तत् सखि करुणे मदर्थं चिन्तां मा रचय यावदचिरमेव हुताशनप्रवेशनेन तस्याः सहचरी भवामि ।

करुणा ॥ सास्रं ॥ सहि एव्वं विसमज्जलणज्जालाउलकणाक-

दुदुस्सहाइं अक्खराइं जप्पन्ती सव्वधा विलुत्तजीविदं मं करेसि । ता पसीद मुहुत्तं धारेदु जीविदं पिअसही जाव इदो तदो पुण्णेसु आसमेसु मुणिअणसमाउलेसु भागीरहीतीरेसु णिउणं णिरूवम्ह । कआवि महामोहभीदा कहिं वि प्पच्छण्णा णिवसदि । *)

शान्तिः ॥ सखि किमन्विष्यते ।

नीवाराङ्कितसैकतानि सरितां कूलानि वैखानसैर्
आक्रान्तानि समिद्वपालचमसव्याप्ता गृहा यज्वनां ।
प्रत्येकं च निरूपिताः प्रतिपदं चत्वार एवाश्रमाः
श्रद्धायाः क्वचिदप्यहो खलु मया वार्तापि नाकर्णिता ॥३॥

करुणा ॥ सहि एव्वं भणामि जइ सा जेव्व सत्ताई सद्धा तदा ताए ण एरसीं दुग्गदिं संभावेमि । ण खु तारसीए पुण्णमयीए एतारसीं अणुहवन्ति असंभावणिज्जं विवत्तिं । **)

शान्तिः ॥ सखि किमु प्रतिकूले विधातरि न संभाव्यते ।

*) सखि एवं विषमज्वलनज्वालाकुलकर्णकटुदुःसहान्यक्षराणि जल्पन्ती सर्वथा विलुप्तजीवितां मां करोषि । तत् प्रसीद मुहूर्तकं धारयतु जीवितं प्रियसखी यावदितस्ततः पुण्येष्वाश्रमेषु मुनिजनसमाकुलेषु भागीरथीतीरेषु निपुणं निरूपयामः । कदाचिन्महामोहभीता कुत्रापि प्रच्छन्ना निवसति ।

**) सखि एवं भणामि यदि सैव सात्त्विकी श्रद्धा तदा तस्या नेदृशीं दुर्गतिं संभावयामि । न खलु तादृश्यः पुण्यमय्य एतादृशीमनुभवन्त्यसंभावनीयां विपत्तिं ।

देवी श्रीजनकात्मजा दशमुखस्यासीद्गृहे रक्षसो
नीता चैव रसातलं भगवती वेदत्रयी दानवैः ।
गन्धर्वस्य मदालसां च तनयां पातालकेतुश्छलाद्
दैत्येन्द्रोऽपजहार हन्त विषमा वामा विधेर्वृत्तयः ॥४॥

तद्भवतु पाषण्डालयेष्वेव तावदनुसरावः ।

करुणा ॥ एव्वं भोदु । *)

॥ इति परिक्रामतः ॥

करुणा ॥ सत्रासं ॥ सहि रक्खसो रक्खसो । **)

शान्तिः ॥ कोऽसौ राक्षसः ।

करुणा ॥ सहि पेक्खह्म पेक्खह्म जो एसो गलन्तमलपङ्कपिच्छिलवीहच्छदुप्पेक्खदेहच्छवी उल्लुञ्चिअचिउरमुक्कवसणदुद्दंसणो सिहिसिहण्डपिच्छअहत्थो इदो जेव्व अहिवट्टदि । ***)

शान्तिः ॥ सखि नायं राक्षसः । निर्वीर्यः खल्वयं ।

करुणा ॥ ता को एसो भविस्सदि । †)

शान्तिः ॥ सखि पिशाच इति शङ्के ।

*) एवं भवतु ।

**) सखि राक्षसो राक्षसः ।

***) सखि प्रेक्षस्व प्रेक्षस्व य एष गलन्मलपङ्कपिच्छिलबीभत्सदुःप्रेक्ष्यदेहच्छविरुल्लुञ्चितचिकुरमुक्तवसनदुर्दर्शनः शिखिशिखण्डपिच्छकहस्त इत एवाभिवर्तते ।

†) तत् क एष भविष्यति ।

करुणा ॥ सहि पप्फुरन्तमहामऊहमालुब्भासिग्रभुग्रणान्तरे ज्जलदि पचण्डमत्तण्डमण्डले कधं पिसाग्राणं ग्रवग्रासो । *)

शान्तिः ॥ तर्ह्यनन्तरमेव नरकविवरादुत्तीर्णः कोऽपि नारकी भविष्यति ॥ विलोक्य विचिन्त्य ॥ ग्रा ज्ञातं । महामोहप्रवर्तितोऽयं दिगम्बरसिद्धान्तः । तत् सर्वथा दूरे परिहरणीयमस्य दर्शनं ।

॥ इति पराङ्मुखी भवति ॥

करुणा ॥ सहि मुहुत्तकं चिट्ठ जाव इत्थ सद्धं ग्रणेसामि । **)

॥ उभे तथा स्थिते ॥

॥ ततः प्रविशति यथानिर्दिष्टो दिगम्बरसिद्धान्तः ॥

दिगम्बरः ॥ णमो ग्रलिहन्ताणं णमो ग्रलिहन्ताणं । णवडुवालघलमज्झे ग्रप्पा दीव इग्र मन्तव्वे । एसे जिणवलभासिदे पलमत्थे मोक्खसुकलदे ॥ परिक्रामति ग्राकाशे ॥ ले ले सावका सुणाध सुणाध । मलमयपुग्गलपिण्डे सग्रलजलेहिं वि केलिसी सुद्धी । ग्रप्पा विमलसहाए लिसिपलिचलणेहिं जाणव्वे । किं भणाध केलिसं लिसिपलिचलणं ति । ता सुणाध । दूले चलणपणामे किरसक्कालं च भोग्रणं मिट्ठं ।

*) सखि प्रस्फुरन्महामयूखमालोद्भासितभुवनान्तरे ज्वलति प्रचण्डमार्तण्डमण्डले कथं पिशाचानामवकाशः ।

**) सखि मुहूर्तकं तिष्ठ यावदत्र श्रद्धामन्वेषयामि ।

इस्सामलं ण कज्जं लिसीणं दालं णमन्ताणं ॥ नेपथ्याभिमुखमवलोक्य ॥ सड्ढे इदो दाव इदो दाव । *)

॥ उभे सभयमवलोकयतः ॥

॥ ततः प्रविशति तदनुरूपवेशा श्रद्धा ॥

श्रद्धा ॥ किं आणवेदि लाउले । **)

॥ शान्तिर्मूर्छिता पतति ॥

दिगम्बरः ॥ सावकाणं कुलं मुहुत्तं एक्कं वि मा पलिहलिस्सदि । ***)

श्रद्धा ॥ जं आणवेदि लाउले । †)

॥ इति निष्क्रान्ता ॥

करुणा ॥ समस्सदु समस्सदु पिअसही । ण खु णाममत्तकेणावि पिअसहीए भेदव्वं जदो सुदं मए अहिंसासआसादो

*) नमोऽर्हद्भ्यः नमोऽर्हद्भ्यः । नवद्वारगृहमध्ये आत्मा दीप इव मन्तव्यः । एष जिनवरभाषितः परमार्थो मोक्षसुखदः । रे रे श्रावकाः शृणुत शृणुत । मलमयपुद्गलपिण्डे सकलजलैरपि कीदृशी शुद्धिः । आत्मा विमलस्वभाव ऋषिपरिचरणैर्ज्ञातव्यः । किं भणथ कीदृशानृषीन्परिचरामिति । तच्छृणुत । दूरे चरणप्रणामः कृतसत्कारं च भोजनं मृष्टं । ईर्ष्यामलं न कार्यमृषीणां दारान् नमयमानानां । श्रद्धे इतस्तावत् ।

**) किमाज्ञापयति राजकुलं ।

***) श्रावकाणां कुलं मुहूर्तमेकमपि मा परिहरिष्यति ।

†) यदाज्ञापयति राजकुलं ।

जं अत्थि पाखण्डाणं वि तमस्स सुदा सद्धेति । तेण एसा तामसी सद्धा भविस्सदि । *)

शान्तिः ॥ समाश्वस्य ॥ सखि एवमेतत् । तथा हि

दुराचारा सदाचारां दुर्दर्शा प्रियदर्शनां ।
अम्बामनुसरत्येषा दुराशा न कथंचन ॥ ५ ॥

तद्भवतु तावत् सौगतेष्वप्यसावन्विष्यतां ।

॥ शान्तिकरुणे परिक्रामतः ॥

॥ ततः प्रविशति भिक्षुरूपः पुस्तकहस्तो बुद्धागमः ॥

भिक्षुः ॥ विचिन्त्य ॥ भो भो उपासकाः

साक्षात् क्षणक्षयिण एव निरात्मकाश्च
यत्रार्पिता बहिरिव प्रतिभान्ति भावाः ।
सैवाधुना विगलिताखिलवासनत्वाद्
धीसंततिः स्फुरति निर्विषयोपरागा ॥ ६ ॥

॥ परिक्रम्य पुनः सश्लाघं ॥ अहो साधुरयं सौगतधर्मः यत्र सौख्यं च मोक्षश्च । तथा हि

आवासो लयनं मनोहरमभिप्रायानुरूपा वणिग्-
भार्या वाञ्छितकालमिष्टमशनं शय्या मृदुप्रस्तराः ।

*) समाश्वासयतु समाश्वासयतु प्रियसखी । न खलु मात्रकेणापि प्रियसख्या भेतव्यं यतः श्रुतं मया अहिंसासकाशात् यदस्ति पाषण्डानामपि तमसः सुता श्रद्धेति । तेनैषा तामसी श्रद्धा भविष्यति ।

श्रद्धापूर्वमुपासिता युवतिभिः क्लृप्ताङ्गरागोत्सव-
क्रीडानन्दभरैर्व्रजन्ति विलसज्ज्योत्स्नोज्ज्वला रात्रयः ॥७॥

करुणा ॥ सहि को एसो तरुणतालतरुप्पलम्बो लम्बन्तकसायपिसङ्गचीवरो मुण्डिअसचूडमुण्डपिण्डो इदो ज्जेव्व आअच्छदि । *)

शान्तिः ॥ सखि बुद्धागम एषः ।

भिक्षुः ॥ प्रकाशं ॥ भो भो उपासका भिक्षवश्च श्रूयतां भगवतः सुगतस्य वाक्यामृतं ॥ पुस्तकं वाचयति ॥ पश्याम्यहं भिक्षवो दिव्येन चक्षुषा लोकानां सुगतिं दुर्गतिं च । संस्क्रियन्ते क्षणिकाः सर्वसंस्काराः । नास्त्यात्मा स्थायी तस्माद्भिक्षुषु दारान् आक्रामत्सु नेर्ष्यितव्यं चित्तमलं हि तद्यदीर्ष्यानाम ॥ नेपथ्याभिमुखमवलोक्य ॥ श्रद्धे इतस्तावत् ।

प्रविश्य श्रद्धा ॥ आणवेदु लाउले । **)

भिक्षुः ॥ उपासकान् भिक्षूंश्च चिरमालिंग्य स्थीयतां ।

श्रद्धा ॥ जं आणवेदि लाउले । ***)

॥ इति निष्क्रान्ता ॥

*) सखि क एष तरुणतालतरुप्रलम्बो लम्बत्कषायपिशङ्गचीवरो मुण्डितसचूडमुण्डपिण्ड इत एवागच्छति ।

**) आज्ञापयतु राजकुलं ।

***) यदाज्ञापयति राजकुलं ।

शान्तिः ॥ सखि इयमपि तामसी श्रद्धा ।

करुणा ॥ एव्वं णेदं । *)

क्षपणकः ॥ भिक्षुमालोक्य उच्चैःशब्दं ॥ अले अले भिक्खुआ इदो दाव किं वि पुछिस्सं । **)

भिक्षुः ॥ सक्रोधं ॥ आः पाप पिशाचाकृते किमेवं प्रलपसि ।

क्षपणकः ॥ अले मुढ कोहं सत्थगदं पुछिस्सं । ***)

भिक्षुः ॥ अरे क्षपणक शास्त्रकथामपि वेत्सि । भवतु प्रतीमस्तावत् ॥ उपसृत्य ॥ किं पृच्छसि ।

क्षपणकः ॥ भण दाव खणविणासिणा तुए कस्स कए वदं धलीअदि । †)

भिक्षुः ॥ अरे श्रूयतां । अस्मत्संततिपतितः कश्चिद् विज्ञानलक्षणः समुच्छिन्नवासनो मोक्ष्यते ।

क्षपणकः ॥ अले मुक्खा जइ कस्सिं वि मण्णन्तले कोवि मुक्के भविस्सदि तदो दे संपदं पणट्ठस्स कदे केलिसं उव-

*) एवमेतत् ।

**) अरे ऽरे भिक्षुक इतस्तावत् किमपि पृच्छामि ।

***) अरे मूढ क्रोधं शास्त्रगतं पृच्छामि ।

†) भण तावत् क्षणविनाशिना त्वया कस्य कृते व्रतं धार्यते ।

आलं कलिस्सदि । अण्णं च पुच्छामि । केण वा ईलिसे धम्मे उवदिट्ठे । *)

भिक्षुः ॥ ननु सर्वज्ञेन भगवता बुद्धेनोक्तः अयमेव धर्मः ।

क्षपणकः ॥ अले सव्वण्णो बुद्धे अत्थि त्ति कधं तुए णादं । **)

भिक्षुः ॥ ननु रे तदागमैरेव प्रसिद्धो बुद्धः सर्वज्ञ इति ।

क्षपणकः ॥ अले लिज्जुअबुद्धिआ जइ तस्स भासिदेण सव्वण्णत्तणं पडिवज्जेसि ता अह्मं वि सव्वं जाणामि तुमं वि पिदपिदामहेह्निं सड्ढं सत्तपुलिसेह्निं दासे त्ति । ***)

भिक्षुः * सक्रोधं * आः पाप पिशाचमलपङ्कधर तवाहं दासः ।

क्षपणकः ॥ अले विहालदासीभुअङ्ग दुट्ठपव्वजिआ दिट्ठान्दे मए एसे दंसिदे । ता पिअं दे विसद्धं भणामि । बुद्धाणुसासणं पलिह्लिअ अलिहन्ताणुसासणं अणुसलिअ दिअम्बलव्वदं जेव्व धारेदु भवं । †)

*) अरे मूर्ख यदि कस्मिन्नपि मन्वन्तरे कोऽपि मुक्तो भविष्यति तदा ते सांप्रतं पाषाणस्य मूले कीदृशमुपकारं करिष्यति । अन्यच्च पृच्छामि । केन वेदृशो धर्म उपदिष्टः ।

**) अरे सर्वज्ञो बुद्धोऽस्तीति कथं त्वया ज्ञातं ।

***) अरे ऋजुबुद्धे यदि तस्य भाषितेन सर्वज्ञत्वं प्रतिपद्यसे तदाहमपि सर्वं जानामि त्वमपि पितृपितामहैः सार्धं सप्तपुरुषैर्दास इति ।

†) अरे विहारदासीभुजङ्ग दुष्टप्रव्रजित दृष्टान्तो मयैष दर्शितः । तत् प्रियं ते विस्रब्धं भणामि । बुद्धानुशासनं परिहृत्य अर्हदनुशासनमनुसृत्य दिगम्बरव्रतमेव धारयतु भवान् ।

भिक्षुः ॥ आः पाप स्वयं नष्टः परान् अपि नाशयितुमिच्छसि ।

स्वाराज्यं प्राज्यमुत्सृज्य लोके निन्द्यामनिन्दितः ।
अभिवाञ्छति को नाम भवान् इव पिशाचताम् ॥ ८ ॥

अपि च । आर्हतमपि धर्मवेदनं कः श्रद्धत्ते ।

क्षपणकः ॥ गहणक्खत्तवालचन्दसूलोपलाअसुक्कलाहुपलमत्थणाणं संवाददंसणेण णिलूविदं भअवदो सव्वणत्तणं अलिहन्तस्स । *)

भिक्षुः ॥ विहस्य ॥ अरे अनादिप्रवृत्तज्योतिषातीन्द्रियज्ञानप्रतारितेन भवतेदमतिकष्टं व्रतमाश्रितं । तथा हि

ज्ञातुं वपुः परिमितः क्षमते त्रिलोकीं
जीवः कथं कथय संगतिमन्तरेण ।
शक्नोति कुम्भनिहितः सुशिखोऽपि दीपो
भावान् प्रकाशयितुमप्युदरे गृहस्य ॥ ९ ॥

तस्माल्लोकद्वयविरुद्धादार्हतमताद्वरं सुगतदर्शनमेव साक्षात् सुखावहमतिरमणीयं पश्यामः ।

शान्तिः ॥ सखि अन्यतो गच्छावः ।

*) ग्रहनक्षत्रचारचन्द्रसूर्योपरागशुक्रराहुपरमार्थज्ञानं संवाददर्शनेन निरूपितं भगवतः सर्वज्ञत्वमर्हतः ।

करुणा ॥ एव्वं भोदु । *)

॥ इति परिक्रामतः ॥

शान्तिः ॥ पुरो विलोक्य ॥ एष पुरस्तात् सोमसिद्धान्तः भवत्वत्रापि तावदनुसरावः ।

॥ ततः प्रविशति कापालिकरूपधारी सोमसिद्धान्तः ॥

कापालिकः ॥ परिक्रम्य ॥

नरास्थिमालाकृतभूरिभूषणः
श्मशानवासी नृकपालभोजनः ।
पश्यामि योगाञ्जनशुद्धदर्शनो
जगन्मिथो भिन्नमभिन्नमीश्वरात् ॥

क्षपणकः ॥ अले एसे कावालिअव्वदं पुलिसे धालेदि । ता णं वि पुछिस्सं ॥ उपसृत्य ॥

अले अले कावालिआ
णलट्ठिमुण्डधालिआ ।
केलिसे तुम्ह धम्मके
केलिसे तुम्ह मोक्खके ॥ ११ ॥ **)

कापालिकः ॥ अरे क्षपणक धर्मं तावदस्माकमवधारय ।

*) एवं भवतु ।

**) अरे एष कापालिकव्रतं पुरुषो धारयति तदेनमपि पृच्छामि ।
अरेऽरे कापालिक नरास्थिमुण्डधारक ।
कीदृशस्तव धर्मः कीदृशस्तव मोक्षः ॥

मस्तिष्कान्त्रवसाभिधारितमहामांसाहुतीर्जुह्वतां
वह्नौ ब्रह्मकपालकल्पितसुरापानेन नः पारणा ।
सद्यःकृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वलैर्
अर्च्यो नः पुरुषोपहारबलिभिर्देवो महाभैरवः ॥ १२ ॥

भिक्षुः ॥ कर्णौ पिधाय ॥ बुद्ध बुद्ध अहो दारुणाधर्मचर्याः ।

क्षपणकः ॥ अलिहन्त अलिहन्त घोलपावकालिणा केणावि विप्पलद्धे वलाए । *)

कापालिकः ॥ सक्रोधं ॥ आः पाप पाखण्डापसद मुण्डितमुण्ड चूडालवेश केशलुञ्चक अरे विप्रलम्बकः किल चतुर्दशभुवनोत्पत्तिस्थितिप्रलयप्रवर्तको वेदान्तसिद्धान्तप्रसिद्धविभवो भगवान् भवानीपतिः । दर्शयामस्तर्हि धर्मस्यास्य महिमानं ।

हरिहरसुरज्येष्ठश्रेष्ठान् सुरान् अहमाहरे
वियति वहतां नक्षत्राणां रुणध्मि गतीरपि ।
सनगनगरामम्भःपूर्णां विधाय महीमिमां
कलशशकलैर्भूयस्तोयं क्षणेन पिबामि तत् ॥ १३ ॥

क्षपणकः ॥ अले कावालिआ अदो डेव्व भणामि केणावि इन्दिआलिणा मायं दंसिअ विप्पलद्धे सि त्ति । **)

*) अर्हन् अर्हन् घोरपापकारिणा केनापि विप्रलब्धो वराकः ।

**) अरे कापालिक अत एव भणामि केनापीन्द्रजालिना मायां दर्शयित्वा विप्रलब्धोऽसीति ।

कापालिकः ॥ आः पाप पुनरपि परमेश्वरमिन्द्रजालिकमित्याक्षिपसि । तन्न मर्षणीयमस्य दौरात्म्यं ॥ खड्गमाकृष्य ॥ तदहमस्य

एतत्करालकरवालनिकृत्तकण्ठ-
नालोच्छलद्बहलफेनिलबुद्बुदौघैः ।
सार्द्धं डमड्डमरुडांकृतिहूतभूत-
वर्गेण भर्गगृहिणीं रुधिरैर्धिनोमि ॥ १४ ॥

॥ इति खड्गमुद्यम्य गच्छति ॥

क्षपणकः ॥ सभयं ॥ महाभाआ अहिंसा पलमे धम्मे त्थि । *)

॥ इति भिक्षोरङ्कं प्रविशति ॥

भिक्षुः ॥ कापालिकं वारयन् । भो भो महाभाग कौतुकप्रवृत्ते वाक्कलहे न युक्तमेतस्मिंस्तापस्विनि प्रहर्तुं ।

कापालिकः खड्गं प्रतिसंहरति ॥

क्षपणकः ॥ समाश्वस्य ॥ महाभाआ जइ संहलिअघोललोसावेसे संवुत्ते तदो हग्गो किं वि पुछिदुं इछामि । **)

कापालिकः ॥ पृछ ।

*) महाभाग अहिंसा परमो धर्मोऽस्ति ।

**) महाभाग यदि संहृतघोररोषावेशः संवृत्तस्तदाऽहं किमपि प्रष्टुमिच्छामि ।

मस्तिष्कान्त्रवसाभिघारितमहामांसाहुतीर्जुह्वतां
वह्नौ ब्रह्मकपालकल्पितसुरापानेन नः पारणा ।
सद्यःकृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वलैर्
अर्च्यो नः पुरुषोपहारबलिभिर्देवो महाभैरवः ॥ १२ ॥

भिक्षुः ॥ कर्णौ पिधाय ॥ बुद्ध बुद्ध अहो दारुणा धर्मचर्याः ।

क्षपणकः ॥ अलिहन्त अलिहन्त घोलपावकालिणा केणावि विप्पलद्धे वलाए । *)

कापालिकः ॥ सक्रोधं ॥ आः पाप पाखण्डापसद मुण्डितमुण्ड चूडालवेश केशलुञ्चक अरे विप्रलम्बकः किल चतुर्दशभुवनोत्पत्तिस्थितिप्रलयप्रवर्तको वेदान्तसिद्धान्तप्रसिद्धविभवो भगवान् भवानीपतिः । दर्शयामस्तर्हि धर्मस्यास्य महिमानं ।

हरिहरसुरज्येष्ठश्रेष्ठान् सुरान् अहमाहरे
वियति वहतां नक्षत्राणां रुणध्मि गतीरपि ।
सनगनगरामम्भःपूर्णां विधाय महीमिमां
कलशशकलैर्भूयस्तोयं क्षणेन पिवामि तत् ॥ १३ ॥

क्षपणकः ॥ अले कावालिआ अदो ज़ेव्व भणामि केणावि इन्दआलिणा मायं दंसिअ विप्पलद्धे सि त्ति । **)

*) अर्हन् अर्हन् घोरपापकारिणा केनापि विप्रलब्धो वराकः ।

**) अरे कापालिक अत एव भणामि केनापीन्द्रजालिना मायां दर्शयित्वा विप्रलब्धोऽसीति ।

कापालिकः ॥ आः पाप पुनरपि परमेश्वरमैन्द्रजालिकमित्याक्षिपसि । तन्न मर्षणीयमस्य दौरात्म्यं ॥ खड्गमाकृष्य ॥ तदहमस्य

एतत्करालकरवालनिकृत्तकण्ठ-
नालोच्छलद्बहलफेनिलबुद्बुदौघैः ।
सार्द्धं डमडुमरुडांकृतिहूतभूत-
वर्गेण भर्गगृहिणीं रुधिरैर्धिनोमि ॥ १४ ॥

॥ इति खड्गमुद्यम्य गच्छति ॥

क्षपणकः ॥ सभयं ॥ महाभाग्रा अहिंसा पलमे धम्मे त्थि । *)

॥ इति भिक्षोरङ्कं प्रविशति ॥

भिक्षुः ॥ कापालिकं वारयन् ॥ भो भो महाभाग कौतुकप्रवृत्ते वाक्कलहे न युक्तमेतस्मिंस्तपस्विनि प्रहर्तुं ।

कापालिकः ॥ खड्गं प्रतिसंहरति ॥

क्षपणकः ॥ समाश्वस्य ॥ महाभाग्रा जइ संहलिग्रघोलललोसावेसे संवुत्ते तदो हग्गो किं वि पुच्छिदुं इच्छामि । **)

कापालिकः ॥ पृच्छ ।

*) महाभाग अहिंसा परमो धर्मोऽस्ति ।

**) महाभाग यदि संहृतघोररोषावेशः संवृत्तस्ततोऽहं किमपि प्रष्टुमिच्छामि ।

क्षपणकः ॥ सुदे तुम्हाणं पलमे धम्मे । अध केलिसे मोक्खसोक्खे । *)

कापालिकः ॥ शृणु

दृष्टं क्वापि सुखं विना न विषयैरानन्दबोधोज्झिता
जीवस्य स्थितिरेव मुक्तिरुपलावस्था कथं प्रार्थ्यते ।
पार्वत्याः प्रतिरूपया दयितया सानन्दमालिङ्गितो
मुक्तः क्रीडति चन्द्रचूडवपुरित्यूचे मृडानीपतिः ॥ १५ ॥

भिक्षुः ॥ महाभाग अश्रद्धेयमेतद्वीतरागस्य मुक्तिरिति ।

क्षपणकः ॥ अले कावालिआ जइ ण लूससि तदो भणामि । सलीली सलागी मुक्के त्ति वेअविलुद्धं **)

कापालिकः ॥ स्वगतं ॥ अये अश्रद्धालितमनयोरन्तःकरणं । भवत्वेवं तावत् ॥ प्रकाशं ॥ श्रद्धे इतस्तावत् ।

॥ ततः प्रविशति कापालिनीरूपधारिणी श्रद्धा ॥

करुणा ॥ सहि पेक्ख पेक्ख रअस्स सुदं सद्धं । जा एसा

विणिद्दणीलुप्पललोअलोअणा
णरत्थिमालाकिदचालुभूसणा ।

*) श्रुतो युष्माकं परमो धर्मः । अथ कीदृशं मोक्षसौख्यं ।

**) अरे कापालिक यदि न कुप्यसि तदा भणामि । शरीरी सरागी मुक्त इति वेदविरुद्धं ।

णिग्रम्बपीणत्थणभालमन्थला
विहादि पुण्णेन्दुमुही विलासिणी ॥ १६ ॥ *)

श्रद्धा ॥ परिक्रम्य ॥ एसम्हि आणावेदु सामी । **)

कापालिकः ॥ प्रिये एनं दुरभिमानिनं भिक्षुं तावद्गृहाण ।

श्रद्धा ॥ भिक्षुमालिङ्गति ॥

भिक्षुः ॥ जनान्तिकं सानन्दं परिष्वज्य रोमाञ्चमभिनीय ॥ अहो सुखस्पर्शा कपालिनी । तथा हि

रण्डा पीनपयोधराः कति मया चण्डानुरागाद्भुज-
द्वन्द्वापीडितपीवरस्तनभरं नो गाढमालिङ्गिताः ।
बुद्धेभ्यः शतशः शपे यदि पुनः कुत्रापि कापालिकी-
पीनोत्तुङ्गकुचावगूहनभवः प्राप्तः प्रमोदोदयः ॥ १७ ॥

अहो पुण्यं कापालिकं चरितं । अहो श्लाघ्यः सोमसिद्धान्तः । आश्चर्यो ऽयं धर्मः । भो महाभाग सर्वथा बुद्धानुशासनमस्माभिरुत्सृष्टं । प्रविष्टाः स्मः पारमेश्वरं सिद्धान्तं । तदाचार्यस्त्वं शिष्यो ऽहं प्रवेशय मां पारमेश्वरीं दीक्षां ।

*) सखि प्रेक्षस्व प्रेक्षस्व रजसः सुतां श्रद्धां । यैषा
विनिद्रनीलोत्पललोललोचना नरास्थिमालाकृतचारुभूषणा ।
नितम्बपीनस्तनभारमन्थरा विभाति पूर्णेन्दुमुखी विलासिनी ॥

**) एषास्मि आज्ञापयतु स्वामी ।

क्षपणकः ॥ अले भिक्खुआ कवालिणीफलसदूसिदे तुमं ता दूलं अपसल । *)

भिक्षुः ॥ आः पाप वञ्चितोऽसि रे कपालिन्याः परिरम्भ-महामहोत्सवेन ।

कापालिकः ॥ प्रिये क्षपणकं गृहाण ।

कपालिनी ॥ क्षपणकमालिङ्गति ॥

क्षपणकः ॥ सरोमाञ्चं ॥ अहो अलिहन्त अलिहन्त कवालिणी-फंससुहं । सुन्दलि देस्सु दाव पुणो अङ्कवालिं ।

॥ स्वगतं ॥ अले महन्ते खु इन्दिअविआले उवत्थिदे ता अत्थि को वि उवायो किं एत्थ वुत्तं भोदु पिछआए टङ्किस्सं ॥ तथा कृत्वा ॥

अयि पीणघणत्थणसोहणा
पलितत्थकुलङ्गविलोअणा ।
जइ लमसि कवालिणि भावकी
ता किं कालिस्सदि सावकी ॥ १८ ॥

अहो कावालिआ एक्कं दंसणं सोक्खमोक्खसाहणं । भो आचालिआ हग्गो उज्झ किङ्कले संपदं संवुत्ते । मं वि महभिरवाणुसासणे दिक्खस्सु धाणेण । **)

*) अरे भिक्षुक कपालिनीस्पर्शदूषितस्त्वं तद्दूरमपसर ।

**) अहो अर्हन् अर्हन् कपालिनीस्पर्शसुखं । सुन्दरि देहि तावत् पुनरङ्कपालीं । अरे

कापालिकः ॥ उपविश्यतां ।

॥ उभौ तथा कुरुतः ॥

कापालिकः ॥ भाजनं समादाय ध्यानं नाटयति ॥

श्रद्धा ॥ भअवं पूरिदं सुराए भाअणं । *)

कापालिकः ॥ विलोक्य पीत्वा शेषं भिक्षुक्षपणयोरर्पयति ॥

इदं पवित्रममृतं पीयतां भवभेषजं ।
पशुपाशसमुच्छेदकारणं भैरवोदितं ॥ १२ ॥

॥ उभौ विमृशतः ॥

क्षपणकः ॥ अम्हाणं अलिहन्ताणुसासणे सुलापाणं णत्थि । **)

भिक्षुः ॥ कथं कापालिकोच्छिष्टां सुरां पास्यामि ।

कापालिकः ॥ किं विमृशसि । श्रद्धे पशुत्वमनयोर्नाद्याप्यपनीयते । नास्मद्वदनसंसर्गदोषादपवित्रां सुरामेतौ मन्येते । तद्भवती स्ववक्त्रासवपूतां कृत्वा अनयोरुपनयतु । यतस्तीर्थिका अपि वदन्ति स्त्रीमुखं तु सदा शुचीति ।

महान् खल्विन्द्रियविकार उपस्थितः तदस्ति कोऽप्युपायः किमत्र युक्तं भवतु पिञ्छिकया छादयिष्यामि ।

अयि पीनघनस्तनशोभना परित्रस्तकुरङ्गविलोचना ।
यदि रमसे कपालिनि भावको किं करिष्यति श्रावको ॥

अहो कापालिकैकं दर्शनं सौख्यमोक्षसाधनं । भो आचार्याहं तव किंकरः सांप्रतं संवृत्तः । मामपि महाभैरवानुशासने दीक्षस्व ध्यानेन ।

*) भगवन् पूरितं सुरया भाजनं ।

**) अस्माकमर्हदनुशासने सुरापानं नास्ति ।

श्रद्धा ॥ जं भवं आणवेदि । *)

॥ इति पानपात्रं गृहीत्वा पीतशेषमुपनयति ॥

भिक्षुः ॥ महाप्रसादः ॥ इति चषकं गृहीत्वा पिबति ॥ अहो सुरायाः सौन्दर्यं ।

निपीता वेश्याभिः सह न कतिवारान् सुवदना-
मुखोच्छिष्टास्माभिर्विकचवकुलामोदमधुरा ।
कपालिन्या वक्त्रासवसुरभिमेतां तु मदिरां
अलब्ध्वा जानीमः स्पृहयति सुधायै सुरगणः ॥ २० ॥

क्षपणकः ॥ अले भिक्खुआ मा सव्वं पिव । कवालिणीवअणासलसं मदिलं मम वि धालेस्सु । **)

भिक्षुः ॥ क्षपणकाय चषकमुपनयति ॥

क्षपणकः ॥ पीत्वा ॥ अहो सुलाए महुलत्तणं अहो सादे अहो गन्धे अहो सुलहित्तणं । चिलं खु अलिहन्ताणुसासणे पडिदे पडिवञ्चिदेम्हि ईलिसेण सुलालसेण । अले भिक्खुआ घोणन्ति मे अङ्गाइं ता सुविस्सं । ***)

॥ तथा कुरुतः ॥

*) यद्भवान् आज्ञापयति ।

**) अरे भिक्षुक मा सर्वं पिब । कपालिनीवदनरसां मदिरां ममापि धारयस्व ।

***) अहो सुराया मधुरत्वं अहो स्वादः अहो गन्धः अहो सुरभित्वं । चिरं खल्वर्हदनुशासने पतितः प्रतिवञ्चितोऽस्मीदृशेन सुरारसेन । अरे भिक्षुक घूर्णन्ति ममाङ्गानि तत् स्वप्स्यामि ।

भिक्षुः ॥ एवं कुर्वः ।

कापालिकः ॥ प्रिये अमू अल्पक्रीतं दासद्वयं लब्धं । तन्नृत्यावस्तावत् ।

॥ उभे नृत्यतः ॥

क्षपणकः ॥ अले भिक्खुआ एसे कावालिए अह वा अचालिए कवालिणीए सद्धं सोहणं णच्चेदि । ता एदाए सद्धं अम्हे वि णच्चामो । *)

भिक्षुः ॥ एवं कुर्वः ।

॥ मदस्खलितं नृत्यतः ॥

क्षपणकः ॥ अयि पाणाथपोत्यादि गायति ॥

भिक्षुः ॥ आचार्य महदाश्चर्यमेतद्दर्शनं यत्राक्लेशमभिमतार्थसिद्धयः संपद्यन्ते ।

कापालिकः ॥ कियदेतदाश्चर्यं पश्यसि ।

अत्रानुज्झितचक्षुरादिविषयासंगेऽपि सिध्यन्त्यमूर्
अत्यासन्नमहोदयप्रणयिनामष्टौ महासिद्धयः ।
वश्याकर्षविमोहनप्रशमनप्रक्षोभणोच्चाटन-
प्रायाः प्राकृतसिद्धयस्तु विदुषां योगान्तरायाः परं ॥ २१ ॥

*) अरे भिक्षुक एष कापालिकोऽथवाचार्यः कपालिन्या सार्द्धं शोभनं नृत्यति । तदेतया सार्द्धमावामपि नृत्यावः ।

क्षपणकः ॥ अले कावालिआ ॥ विमृश्य ॥ अले आचालिआ अहवा आचालिआ लाअउला आचालिआ । *)

भिक्षुः ॥ अयमनयातिशयपीतया मदिरया दूरमुन्मनीकृतस्तपस्वी । तत् क्रियतामस्य मदापनयनं ।

कापालिकः ॥ एवं भवतु ॥ इति स्वमुखोच्छिष्टताम्बूलं क्षपणकाय ददाति ॥

क्षपणकः ॥ स्वस्थीभूय ॥ आचालिआ एव्वं पुच्छामि । जादिसी तुम्हाणं सुलाए आह्लणसिद्धी किं तादिशी इत्थिआपुलिसेसु वि अत्थि । **)

कापालिकः ॥ किं विशेषेण पृच्छसि । पश्य

विद्याधरीं वाथ सुराङ्गनां वा
नागाङ्गनां वाप्यथ यक्षकन्यां ।
यद्यन्ममेष्टं भुवनत्रयेऽपि
विद्याबलात् तत्तदुपाहरामि ॥ २२ ॥

क्षपणकः ॥ भो एद्दं मए गणिदेण णादं जं सव्वे अम्हे महामोहस्स किंकले त्ति । ***)

*) अरे कापालिक । अरे आचार्य अथवा आचार्य राजकुलाचार्य ।

**) आचार्यैवं पृच्छामि । यादृशी युष्माकं सुरायामाहरणसिद्धिः किं तादृशी स्त्रीपुरुषेष्वप्यस्ति ।

***) भो एतन्मया गणितेन ज्ञातं यत् सर्वे वयं महामोहस्य किंकरा इति ।

उभौ ॥ यथा ज्ञातमायुष्मता एवमेतत् ।

क्षपणकः ॥ ता लाअकज्जं किं वि मन्तीअन्दु । *)

कापालिकः ॥ किं तत् ।

क्षपणकः ॥ धम्मस्स सुदा सद्धा महालाअस्स आणाए आकलीअदु त्ति । **)

कापालिकः ॥ कथय क्वासौ दास्याः पुत्री । एष तामचिरमेव विद्यया बलादुपाहरामि ।

क्षपणकः ॥ खटिकामादाय गणयति ॥

शान्तिः ॥ सखि अभ्यागतमिह हताशानामालापं शृणोमि । तदवधानेन तावदाकर्णयावः ।

करुणा ॥ सहि एव्वं करेम्ह । ***)

॥ उभे तथा कुरुतः ॥

क्षपणकः ॥

णत्थि जले णत्थि थले णत्थि गिलिवले णत्थि पदाले ।
विण्हुभत्तीए सहिदा वसइ हिदए महाप्पाणाणं ॥ २३ ॥ †)

*) महाराजकार्यं किमपि मन्त्रयन्तु ।

**) धर्मस्य सुता श्रद्धा महाराजस्याज्ञयाहूयतामिति ।

***) सखि एवं कुर्वः ॥

†) नास्ति जले नास्ति स्थले नास्ति गिरिवरे नास्ति पाताले ।
विष्णुभक्त्या सहिता वसति हृदये महात्मनां ॥

करुणा ॥ सानन्दं ॥ सहि दिट्ठिआ वड्ढसि विण्हुभत्तीए देवीए पासपलिवत्तिणी सद्धेत्ति । *)

शान्तिः ॥ हर्षं नाटयति ॥

भिक्षुः ॥ अथ धर्मस्य कामादपक्रान्तस्य कुत्र वृत्तिः ।

क्षपणकः ॥ पुनर्गणयित्वा पाल्शि ज्ञले इति पठति ॥

कापालिकः ॥ सविषादं ॥ अहो महत् कष्टमापतितं महाराजस्य । तथा हि

मूलं देवी सिद्धये विष्णुभक्तिस्
तां च श्रद्धानुव्रता सत्यकन्या ।
कामान्मुक्तस्तत्र धर्मोऽप्यभूच्चेत्
सिद्धं मन्ये तद्विवेकस्य कृत्यं ॥ २४ ॥

तथापि तावदसुव्ययेनापि स्वामिनः प्रयोजनमनुष्ठेयं । तन्महाभैरवीं विद्यां धर्मश्रद्धयोराहरणाय प्रस्थापयामः ।

॥ इति निष्क्रान्ताः ॥

शान्तिः ॥ सखि आवामपि एवं हृताशानां व्यवसायं देव्यै विष्णुभक्त्यै निवेदयावः ।

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति ॥

॥ तृतीयोऽङ्कः ॥

*) सखि दिष्ट्या वर्धसे विष्णुभक्त्या देव्याः पार्श्वपरिवर्तिनी श्रद्धेति ।

॥ अथ ॥

॥ चतुर्थोऽङ्कः ॥

॥ ततः प्रविशति मैत्री ॥

मैत्री ॥ सुदं मए मुदिताए साअसादो जधा महाभैरवीगंसणासंब्भमादो भअवदीए विण्हुभत्तीए परित्तादा पिअसही सद्धेत्ति । ता उक्कण्ठिदेण हिअएण पिअसहीं कहिं पेक्खिस्सं *)

॥ परिक्रामति ॥

॥ ततः प्रविशति श्रद्धा ॥

श्रद्धा ॥ सभयोत्कम्पं पठति ॥

घोरां नारकपालकुण्डलवतीं विद्युच्छटां दृष्टिभिर्
मुञ्चन्तीं विकरालमूर्तिमनलज्वालापिशङ्गैः कचैः ।
दंष्ट्राचन्द्रकलाङ्कुरान्तरलसज्जिह्वां महाभैरवीं
पश्यन्त्या इव मे मनः कदलिकेवाद्याप्यहो वेपते ॥ १ ॥

*) श्रुतं मया मुदितायाः सकाशात् यथा महाभैरवीग्रसनसंभ्रमाद्भगवत्या विष्णुभक्त्या परित्राता प्रियसखी श्रद्धेति तदुत्कण्ठितेन हृदयेन प्रियसखीं कदा प्रेक्षिष्ये ।

मैत्री ॥ अये एसा मे पिअसही सद्धा भअसमुब्भन्तहिअआ कदलिआकम्पतरलेहिं अङ्गेहिं किं वि मन्तयन्दी संमुहागदं वि मं ण पेक्खदि । ता आलविस्सं दाव ॥ प्रकाशं ॥ पिअसहि सद्धे किं ति तुम्हं उत्ताविदहिअआ मं वि ण विलोएसि । *)

श्रद्धा ॥ विलोक्य सोच्छ्वासं ॥ अये मे प्रियसखी मैत्री ।

कालरात्रिकरालास्यदन्तान्तर्गतया मया ।
दृष्टासि सखि सैव त्वं पुनरत्रैव जन्मनि ॥ २ ॥

तदेहि परिष्वजस्व ।

मैत्री ॥ तथा कृत्वा ॥ सहि तधा विण्हुभत्तिणिब्भच्छिदप्पहावाए महाभैरवीए कहं दे अज्ज वि वेवन्ति अङ्गाइं । **)

श्रद्धा ॥ घोरामित्यादि पठति ॥

मैत्री ॥ सत्रासं ॥ अहो हदासा घोरदंसणा । अध ताए आअदाए किं किदं । ***)

श्रद्धा ॥ श्येनावपातमवपत्य पदद्वये मां
आदाय धर्ममपरेण करेण घोरा ।

*) अये एषा मे प्रियसखी श्रद्धा भयसमुद्भ्रान्तहृदया कदलीकम्पतरलैरङ्गैः किमपि मन्त्रयन्ती संमुखागतामपि मां न प्रेक्षते । तदालपिष्यामि तावत् । प्रियसखि श्रद्धे किमिति त्वमुत्तापितहृदया मामपि न विलोकयसि ।

**) सखि तथा विष्णुभक्तिनिर्भर्त्सितप्रभावाया महाभैरव्याः कथं ते अद्यापि वेपन्तेऽङ्गानि ।

***) अहो हताशा घोरदर्शना । अथ तयागतया किं कृतं ।

वेगेन सा गगणमुत्पतिता नखाग्र-
कोटिस्फुरत्पिशितपिण्डयुगेव गृध्री ॥ ३ ॥

मैत्री ॥ हद्धी हद्धी । *)

॥ इति मूर्छति ॥

श्रद्धा ॥ सखि समाश्वसिहि समाश्वसिहि ।

मैत्री ॥ समाश्वस्य ॥ तदो तदो । **)

श्रद्धा ॥ ततःपरमस्मदीयार्तनादोपजातदयार्द्रया देव्या
भ्रूभङ्गभीमपरिपाटलदृष्टिपातं
उद्गाढकोपकुटिलं च तया व्यलोकि ।
सा वज्रपातहतशैलशिलेव भूमौ
व्याभग्नजर्जरशिरोऽस्थि यथा पपात ॥ ४ ॥

मैत्री ॥ दिट्ठिआ मई विअ सद्दूलमुहादो विब्भट्टा खेमेण संजीविदा पिअसही । तदो तदो । ***)

श्रद्धा ॥ ततो देव्या समुपजाताभिनिवेशमुक्तमेवं यदस्य दुरात्मनो महामोहहतकस्य मामप्यवज्ञाय वर्तमानस्य समूलमुन्मूलनं करिष्यामीति । आदिष्टा चाहं देव्या यथा गच्छ श्रद्धे

*) हाधिक् हाधिक् ।

**) ततस्ततः ।

***) दिष्ट्या मृगीव शार्दूलमुखतो विभ्रष्टा क्षेमेण संजीविता प्रियसखी । ततस्ततः ।

ब्रूहि विवेकं कामक्रोधादीनां निर्जयायोद्योगः क्रियतां ततो वैराग्यं प्रादुर्भविष्यति अहं च यथासमयं प्राणायामाद्यनुष्ठानेन युष्मत्सैन्यमनुग्रहीष्यामि ऋतम्भरादयश्च देव्यः शान्त्यादिकौशलेन उपनिषद्देव्या संगतस्य भगवतः प्रबोधोदयमनुविधास्यन्ति । तदहमिदानीं विवेकसंनिधिं प्रस्थिता । त्वं पुनः किमाचरन्ती दिवसान् अतिवाहयसि ।

मैत्री ॥ अम्हे वि विण्हुभत्तीए आणाए चतस्सो बहिणिआओ विवेअसिद्धिकालणेण महाप्पाणं हिअए वत्ताम । *)

॥ संस्कृतमाश्रित्य ॥ ते हि

ध्यायन्ति मां सुखिनि दुःखिनि चानुकम्पां
पुण्यक्रियेषु मुदितां कुमतावुपेक्षां ।
एवं प्रसादमुपयाति हि रागलोभ-
द्वेषादिदोषकलुषोऽप्ययमन्तरात्मा ॥ ५ ॥

तदेवं चतस्रोऽपि भगिन्यो वयं तदभ्युदयव्यापारेणैव वासरान् नयामः । कुत्रेदानीं प्रियसखी महाराजमालोकयति ।

श्रद्धा ॥ देव्यैतदेवमुक्तं । अस्ति राढाभिधानो जनपदः । तत्र भागीरथीपरिसरालंकारभूते चक्रतीर्थे मीमांसानुगतया मत्या

*) वयमपि विष्णुभक्तेराज्ञया चतस्रो भगिन्यो विवेकसिद्धिकारणेन महात्मनां हृदये वर्तामहे ।

कथंचिद्धार्यमाणप्राणो व्याकुलेनान्तरात्मना विवेक उपनिषद्देव्याः संगमार्थं तपस्तपस्यतीति ।

मैत्री ॥ ता गच्छदु पिअसही अहं वि सकं णिओअं अणुचिट्ठामि । *)

श्रद्धा ॥ एवं भवतु ।

॥ इति निष्क्रान्ते ॥

॥ विष्कम्भकः ॥

॥ ततः प्रविशति राजा प्रतीहारी च ॥

राजा ॥ आः पाप महामोहहतक सर्वथा हतस्त्वयायं महाजनः । तथा हि

शान्तेऽनन्तमहिम्नि निर्मलचिदानन्दे तरङ्गावली-
निर्मुक्तेऽमृतसागराम्भसि मनाङ् मग्नोऽपि नाचामति ।
निःसारे मृगतृष्णिकार्णवजले श्रान्तो विमूढः पिबत्य्
आचामत्यवगाहतेऽभिरमते मज्जत्यथोन्मज्जति ॥ ६ ॥

अथ वा संसारचक्रवाहकस्य महामोहस्याबोधो मूलं तस्य च तत्त्वावबोधादेव निवृत्तिः । यतः

अमुष्य संसारतरोरबोध-
मूलस्य नोन्मूलविनाशनाय ।

*) तद्गच्छतु प्रियसखी अहमपि स्वकं नियोगमनुतिष्ठामि ।

विश्वेश्वराराधनबीजजातात्
तत्त्वावबोधादपरोऽभ्युपायः ॥ ७ ॥

प्रायश्च सुकृतिनां व्यवसितेऽर्थे देवा यान्ति सहायतां इति तत्त्वविदो व्याहरन्ति । तथा च देव्या विष्णुभक्त्या संदिष्टं उद्योगः कामादिविजये क्रियतामिति अहमपि भवदर्थे गृहीतयत्नेति । तत्र कामस्तावत् प्रथमो वीरो वस्तुविचारेणैव जीयते । तद्भवतु तमेव तावन्निर्जयार्थमादिशामि । वेदवति आहूयतां वस्तुविचारः ।

प्रतीहारी ॥ जं देवो आणावेदि । *)

॥ इति निष्क्रम्य वस्तुविचारेण सह प्रविशति ॥

वस्तुविचारः ॥ अहो निर्विचारसौन्दर्याभिमानवर्धिष्णुना कामहतकेन हि निहतं जगत् । अथ वा दुरात्मना महामोहेनैव । तथा हि

कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युन्नमत्-
पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ।
दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति विद्वान् अपि
प्रत्यक्षाशुचिपुत्रिकां स्त्रियमहो मोहस्य दुश्चेष्टितं ॥ ८ ॥

अपि च यथावस्तु विचारयताममन्दमतीनामपि पिशितपङ्का-

*) यद्देव आज्ञापयति ।

वनद्धास्थिपञ्जरमयी स्वभावदुर्गन्धिर्बीभत्सवेशा नारीति नास्ति विरतिः । तदत्र विस्पष्ट एवेतरगुणाध्यासः । तथा हि

मुक्ताहारलता रणन्मणिमया हैमास्तुलाकोटयो
रागः कुङ्कुमसंभवः सुरभयः पौष्पा विचित्राः स्रजः ।
वासश्चित्रदुकूलमल्पमतिभिर्नार्यामहो कल्पितं
बाह्यान्तः परिपश्यतां तु निरयो नारीति नाम्ना कृतं ॥९॥

॥ आकाशे ॥ आः पाप काम चाण्डाल किमनालम्बनमेवाविर्भवता व्याकुलीक्रियते जनः । तथा ह्ययमेवाभिमन्यते

बाला मामियमिच्छतीन्दुवदना सानन्दमुद्वीक्षते
नीलेन्दीवरलोचना पृथुकुचोत्पीडं परीरिप्सते ।

अरे मूढ

का त्वामिच्छति का च पश्यति पशो मांसास्थिभिर्निर्मिता
नारी वेद न किंचिदत्र स पुनः पश्यत्यमूर्तः पुमान् ॥१०॥

प्रतीहारी ॥ इदो एदु महाभाओ । *)

॥ इत्युभौ परिक्रामतः ॥

प्रतीहारी ॥ एसो महाराओ उवविट्ठो चिट्ठदि । ता उवसप्पदु भवं । **)

*) इत एतु महाभाग ।

**) एष महाराज उपविष्टस्तिष्ठति । तदुपसर्पतु भवान् ।

वस्तुविचारः ॥ उपसृत्य ॥ जयतु जयतु देवः । एष वस्तुविचारः प्रणमति ।

राजा ॥ इहोपविश्यतां ।

वस्तुविचारः ॥ उपविश्य ॥ देव एष ते किंकरः संप्राप्त आज्ञयानुगृह्यतां ।

राजा ॥ महामोहेन सहास्माकं संप्रवृत्तः संग्रामः । तदत्र कामस्तस्य प्रथमो वीरः तस्य च प्रतिवीरतयास्माभिर्भवान् निरूपितः ।

वस्तुविचारः ॥ धन्योऽस्मि येन स्वामिनाहमेवं संभावितः ।

राजा ॥ अथ कया शस्त्रविद्यया भवान् कामं जेष्यति ।

वस्तुविचारः ॥ आः पञ्चशरः कुसुमधन्वा कामो जेतव्य इत्यत्रापि शस्त्रग्रहणापेक्षा । पश्य

दृढतरमपिधाय द्वारमारात् कथंचित्
स्मरणविपरिवृत्तौ दर्शने योषितां च ।
परिणतिविरसत्वं देहबीभत्सतां वा
प्रतिमुहुरनुचिन्त्योन्मूलयिष्यामि कामं ॥ ११ ॥

राजा ॥ साधु साधु ।

वस्तुविचारः ॥ अपि च

विपुलपुलिनाः कल्लोलिन्यो नितान्तपतङ्करी-
मसृणितशिलाः शैलाः सान्द्रद्रुमा वनराजयः ।
यदि शमगिरो वैयासिक्यो बुधैश्च समागमः
क्व पिशितवसामय्यो नार्यस्तथा क्व च मन्मथः ॥ १२ ॥

नारीति नाम प्रधानमस्त्रं कामस्य । तेन तस्यां जितायां तत्सहायाः सर्व एव विफलारम्भा भङ्गमासादयिष्यन्ति । तथा हि

चन्द्रश्चन्दनमिन्दुधामधवला गुञ्जद्विरेफावली-
झंकारोन्मुखरा विलासविपिनोपान्ता वसन्तोदयाः ।
मन्द्रध्यानघनोदयाश्च दिवसा मन्दाः कदम्बानिलाः
शृङ्गारप्रमुखाश्च कामसुहृदो नार्यां जितायां जिताः ॥ १३ ॥

तदलमतिविलम्बेन । आदिशतु स्वामी ।

सोऽहं प्रकीर्णैः परितो विचारैः
शरैरिवोन्मथ्य बलं परेषां ।
सैन्यं कुरूणामिव सिन्धुराजं
गाण्डीवधन्वेव निहन्मि कामं ॥ १४ ॥

राजा ॥ सप्रसादं ॥ तत् सज्जीभवतु भवान् शत्रुविजयाय ।

वस्तुविचारः ॥ यदादिशति देवः ।

॥ इति प्रणम्य निष्क्रान्तः ॥

राजा ॥ वेदवति क्रोधस्य विजयाय क्षमैवाहूयतां ।

प्रतीहारी ॥ जं देवो आणवेदि । *)

॥ इति निष्क्रम्य क्षमया सह प्रविशति ॥

क्षमा ॥

क्रोधान्धकारविकटभ्रुकुटीतरङ्ग-
भीमस्य सान्ध्यकिरणारुणरौद्रदृष्टेः ।
निःकम्पनिर्मलपयोधिगभीरवीरा
धीराः परस्य परिवादगिरः सहन्ते ॥ १५ ॥

॥ सश्लाघमात्मानं निर्वर्ण्य ॥

क्लमो न वाचां शिरसो न शूलं
न चित्ततापो न तनोर्विमर्दः ।
न चापि हिंसादिरनर्थयोगः
श्लाघ्या परं क्रोधजयेऽक्षमेका ॥ १६ ॥

॥ उभे परिक्रामतः ॥

प्रतीहारी ॥ एसो देवो । ता उवसप्पदु पिअसही । **)

क्षमा ॥ उपसृत्य ॥ जयतु जयतु देवः । एषा देवस्य दासी क्षमा साष्टाङ्गपातं प्रणमति ।

राजा ॥ क्षमेऽत्रोपविश्यतां ।

क्षमा ॥ उपविश्य ॥ आज्ञापयतु देवः किमर्थमाहूता दासीजनः ।

*) यद्देव आज्ञापयति ।

**) एष देवः । तदुपसर्पतु प्रियसखी ।

राजा ॥ अस्मिन् संग्रामे दुरात्मा क्रोधस्त्वया जेतव्यः ।

क्षमा ॥ देवस्यानुग्रहान्महामोहमपि जेतुं पर्याप्तास्मि किं पुनः क्रोधं तनुचरमात्रं । तदहमचिरादेव

तं पापकारिणमकारणबाधितारं
स्वाध्यायदेवपितृयज्ञतपःक्रियाणां ।
क्रोधं स्फुलिङ्गमिव दृष्टिभिरुद्वमन्तं
कात्यायनीव महिषं विनिपातयामि ॥ १७ ॥

राजा ॥ क्षमे शृणुमस्तावत् क्रोधविजयोपायं ।

क्षमा ॥ देव विज्ञापयामि ।

क्रुद्धे स्मेरमुखात्प्रधारणमथाविष्टे प्रसादक्रमो
व्याक्रोशे कुशलोक्तिरात्मदुरितच्छेदोत्सवस्ताडने ।
धिग् जन्तोरजितात्मनोऽस्य महती दैवादुपेता विपद्
दुर्वारेति दयारसार्द्रमनसां क्रोधस्य कुत्रोदयः ॥ १८ ॥

राजा ॥ साधु साधु ।

क्षमा ॥ देव क्रोधस्य विजयादेव हिंसापारुष्यमानमात्सर्यादयोऽपि विजिता एव भविष्यन्ति ।

राजा ॥ तत् प्रतिष्ठतां भवती विजयाय ।

क्षमा ॥ यदाज्ञापयति देवः ।

॥ इति निष्क्रान्ता ॥

राजा ॥ प्रतीहारीं प्रति ॥ वेदवति आह्वयतां लोभस्य जेता संतोषः ।

प्रतीहारी ॥ जं देवो आणवेदि । *)

॥ इति निष्क्रम्य संतोषेण सह प्रविशति ॥

संतोषः ॥ विचिन्त्य सानुक्रोशं ॥

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरितां ।
मृदुस्पर्शा शय्या सुललितलतापल्लवमयी
सहन्ते संतापं तदपि धनिनां द्वारि कृपणाः ॥ १९ ॥

॥ आकाशे ॥ अरे मूर्खलुब्ध दुरुच्छेदः खल्वयं भवतो व्यामोहः । तथा हि

समारम्भा भग्नाः कति कति न वारांस्तव पशो
पिपासोस्तुच्छेऽस्मिन् द्रविणमृगतृष्णार्णवजले ।
तथापि प्रत्याशा विरमति न ते मूढ शतधा
विदीर्णं यच्चेतो नियतमशनीग्रावघटितं ॥ २० ॥

इदं ते लोभान्धस्य चेष्टितं चेतसि चमत्कारमातनोति । यतः

लभ्यं लब्धमिदं च लभ्यमधिकं तन्मूललभ्यं ततो
लब्धं चापरमित्यनारतमहो मुग्धो धनं ध्यायसि ।
नैतद्वेत्सि पुनर्भवन्तमचिरादाशापिशाची बलात्
सर्वग्रासमियं ग्रसिष्यति महालोभान्धकारावृतं ॥ २१ ॥

*) यद्देव आज्ञापयति ।

अपि च ।

धनं तावल्लब्धं कथमपि तथाप्यस्य नियतं
विनाशे नाशे वा तव सति वियोगोऽस्त्युभयथा ।
अनुत्पादः श्रेयान् किमु कथय पथ्योऽथ विलयो
विनाशो लब्धस्य व्ययपतितरां न त्वनुदयः ॥ २२ ॥

किं च ।

मृत्युर्माग्यति मूर्ध्नि शश्वदुरगी घोरा जरारूपिणी
त्वामेषा ग्रसते परिग्रहमयैर्गृध्रैर्जगद्वस्यते ।
धूत्वा बोधजलैरबोधबहुलं तल्लोभजन्यं रजः
संतोषामृतसागराम्भसि मनाङ्क्मग्नः सुखं जीवति ॥२३॥

प्रतीहारी ॥ एसो सामी । ता उवसप्पदु महाभाओ । *)

संतोषः ॥ तथा कृत्वा ॥ जयतु जयतु स्वामी । एष संतोषः प्रणमति ।

राजा ॥ इहोपविश्यतां ।

॥ इति स्वसंनिधावुपवेशयति ॥

संतोषः ॥ सविनयमुपविश्य ॥ एष प्रेष्यजन आज्ञाप्यतां देवेन ।

राजा ॥ विदितप्रभाव एव भवान् तदलमत्र विलम्बेन लोभं जेतुं वाराणसीं प्रति प्रतिष्ठतां ।

*) एष स्वामी । तदुपसर्पतु महाभागः ।

संतोषः ॥ यदाज्ञापयति देवः । सोऽहं

नानामुखं विजयिनं जगतां त्रयाणां
देवद्विजातिवधबन्धनलब्धवृद्धिं ।
रक्षोऽधिनाथमिव दाशरथिः प्रसह्य
निर्जित्य लोभमवशं तरसा पिनष्मि ॥ २४ ॥

॥ इति निष्क्रान्तः ॥

प्रविश्य विनीतवेशः पुरुषः ॥ देव संभृतानि विजयप्रयाणमङ्गलानि प्रत्यासन्नश्च मौहूर्तिकावेदितः प्रस्थानसमयः ।

राजा ॥ यद्येवं सेनाप्रस्थानायादिश्यन्तां सेनापतयः ।

पुरुषः ॥ यदाज्ञापयति देवः ।

॥ इति निष्क्रान्तः ॥

॥ नेपथ्ये ॥

सज्यन्तां कुम्भभित्तिच्युतमदमदिरामत्तभृङ्गाः करीन्द्रा
युज्यन्तां स्यन्दनेषु प्रसभजितमरुच्चण्डवेगास्तुरङ्गाः ।
कुन्तैर्नीलोत्पलानां वनमिव ककुभामन्तराले सृजन्तः
पादाताः संचरन्तु प्रसभमसिलसत्पाणयोऽथाश्ववाराः ॥२५॥

राजा ॥ भवतु कृतमङ्गलाः प्रतिष्ठामहे ॥ पारिपार्श्विकं प्रति ॥ सारथिरादिश्यतां सांग्रामिकं रथं सज्जीकृत्योपनयतु ।

पारिपार्श्विकः ॥ यदाज्ञापयति देवः ।

॥ इति निष्क्रान्तः ॥

॥ ततः प्रविशति यथोक्तं रथमादाय सारथिः ॥

सारथिः ॥ देव एष सज्जीकृतो रथः । तदारोहत्वायुष्मान् ।

राजा ॥ कृतमङ्गलविधी रथारोहणं नाटयति ॥

सारथिः ॥ रथवेगं निरूपयित्वा ॥ आयुष्मन् पश्य पश्य

उद्धूतपांशुपटलानुमितप्रबन्ध-
धावत्खुराग्रचयचुम्बितभूमिभागाः ।
निर्मथ्यमानजलधिध्वनिघोरघोषं
एते रथं गगणसीम्नि वहन्ति वाहाः ॥ २६ ॥

इयं च नातिदूरे दर्शनपथमवतीर्णा त्रिभुवनपावना वाराणसी नाम नगरी ।

अमी धारायन्त्रस्खलितजलझंकारमुखरा
विभाव्यन्ते भूयः शशिकरमुषः सौधशिखराः ।
विचित्रा यत्रोच्चैः शरदमलमेघान्तविलसत्-
तडिल्लेखालक्ष्मीं वितरति पताकावलिरियं ॥ २७ ॥

एताश्च प्रतिमुकुललग्नमधुपावलीरणितमुखरा जृम्भारम्भभरविगलन्मकरन्ददुर्दिनाः कुसुमसुरभयो नातिदूरे श्यामायमानघनच्छदच्छायातरवो नगरपर्यन्तोद्यानभूमयः । यत्रैते मरुतोऽपि गृहीतपाशुपतव्रतास्तापसा इव लक्ष्यन्ते । तथा हि

तोयार्द्राः सुरसरितः सिताः परागै-
रर्चन्तश्च्युतकुसुमैरिवेन्दुमौलिं ।
प्रोद्गीतां मधुपरुतैः स्तुतिं पठन्तो
नृत्यन्ति प्रचलललताभुजैः समीराः ॥ २८ ॥

राजा ॥ सानन्दं विलोक्य ॥

सैषान्तर्दधती तमोविघटनादानन्दमात्मप्रभं
चेतः कर्षति चन्द्रचूडवसतिर्विश्चेव मुक्तेः पदं ।
भूमेः कण्ठविलम्बिनीव कुटिला मुक्तावली जाह्नवी
यत्रेयं हसतीव फेनपटलैर्वक्रां कलामैन्दवीं ॥ २९ ॥

सारथिः ॥ परिक्रम्य ॥ आयुष्मन् पश्य पश्य इदं तत् सुरसरित्परिसरालंकारभूतं भगवतः पावनमनादेरादिकेशवस्य विष्णोरायतनं ।

राजा ॥ सहर्षं ॥ अये

एष देवः पुराविद्भिः नेत्रस्यात्मेति गीयते ।
अत्र देहं समुत्सृज्य पुण्यभाजो विशन्ति यं ॥ ३० ॥

सारथिः ॥ आयुष्मन् पश्य पश्य एते तावत् कामक्रोधलोभादयोऽस्मद्दर्शनमात्रादितो देशाद्दूरमतिक्रामन्ति ।

राजा ॥ एवमेतत्। तद्भवतु ॥ प्रविश्य ॥ जयतु जयतु भगवान्। स्वाभीष्टसिद्धये भगवन्तं नमस्यामः ॥ रथादवतीर्य प्रविश्यालोक्य च ॥ जयतु जयतु भगवान्। अमरचयचमूचक्रचूडामणिश्रेणिनीराजितोपान्तपादद्वयाम्भोजराजन्नखद्योतखद्योतकिर्मीरितस्वर्णपीठ स्फुरद्द्वैतविश्रान्तिसंतानसंतप्तवन्दारुसंसारनिद्रापहारैकदक्ष क्ष्मामण्डलोद्धारसंभारसंघट्टदंष्ट्राग्रकोटिस्फुरच्छैलचक्रक्रमाक्रान्तलोकत्रय प्रबलभुजबलोद्धूतगोवर्धनच्छत्रनिर्वारिताखण्डलोद्योजिताकाण्डचण्डाम्बुवाहातिवर्षत्रसद्गोकुलत्राणविस्मापिताशेषविश्व प्रभो विबुधरिपुवधूवर्गसीमन्तसिन्दूरसन्ध्यामयूखच्छटोन्मार्जनोद्दामधामाधिप त्रस्तदैत्येन्द्रवक्षस्तटीपाटनाकुण्ठभास्वन्नखश्रेणिपाणिद्वयन्यस्तविस्तारिरक्तार्णवामग्नलोकत्रय त्रिभुवनभयकृत्कैटभोद्दण्डकण्ठास्थिकूटस्फुटोन्मार्जितोद्दामचक्रस्फुरज्ज्योतिरुल्लासितोड्डामरोद्दण्डदोर्दण्ड खण्डेन्दुचूडप्रिय प्रौढदोर्दण्डविभ्रान्तमन्थाचलक्षुब्धदुग्धाम्बुधिप्रोत्थितश्रीभुजावल्लिसंश्लेषसंक्रान्तपीनस्तनाभोगपत्रावलीलाञ्छितोरःस्थलस्थूलमुक्ताफलोदारहारप्रभामण्डलप्रस्फुरत्कण्ठ वैकुण्ठ भक्तस्य लोकस्य संसारमोहच्छिदं देहि बोधोदयं देव तुभ्यं नमः।

॥ निर्गमं नाटयित्वा विलोक्य च ॥ साधुरयमेवास्माकं निवासोचितो देशः । तदत्रैव स्कन्धावारं निवेशयामः ।

॥ इति निष्क्रान्तौ ॥

॥ इति ॥

॥ चतुर्थोऽङ्कः ॥

॥ अथ ॥

॥ पञ्चमोऽङ्कः ॥

॥ ततः प्रविशति श्रद्धा ॥

श्रद्धा ॥ विचिन्त्य ॥ खल्वयं सिद्धः पन्थाः । यतः

निर्दहति कुलमशेषं ज्ञातीनां वैरसंभवः क्रोधः ।
वनमिव घनपवनाहततरुवरसंघट्टसंभवो दहनः ॥ १ ॥

॥ साश्रं ॥ अहो दुर्वारो दारुणः सोदरव्यसनजन्मा शोकानलो यो विवेकजलधरशतैरपि न मन्दीक्रियते । तथा हि

ध्रुवं ध्वंसो भावी जलनिधिमहीशैलसरितां
अतो मृत्योः शीर्यत्तृणलघुषु का जन्तुषु कथा ।
तथाप्युच्चैर्बन्धुव्यसनजनितः कोऽपि विषमो
विवेकप्रोन्माथी दहति हृदयं शोकदहनः ॥ २ ॥

येन तथा क्रूरप्रकृतिकेष्वपि भ्रातृषु कामक्रोधादिषु कथाव-शेषतां गतेषु ।

निकृन्ततीव मर्माणि देहं शोषयतीव मे ।
दहतीवान्तरात्मानं क्रूरः शोकाग्निरुच्छिखः ॥ ३ ॥

॥ विचिन्त्य ॥ आदिष्टास्मि देव्या विष्णुभक्त्या । वत्से श्रद्धे अहमत्र हिंसाप्रायसमरदर्शनपराङ्मुखी तेन वाराणसीमुत्सृज्य शालग्रामाभिधाने भगवतः क्षेत्रे कंचित् कालमतिपालयामि त्वं तु यथावृत्तमागत्य मे निवेदयिष्यसीति । तदहं देव्याः सकाशं गत्वा सर्वमेतत्समरवृत्तान्तमावेदयामि ॥ परिक्रम्यावलोक्य च ॥ एतच्चक्रतीर्थं यत्रायं संसारसागरोत्तारतरणिकर्णधारो भगवान् हरिः स्वयं प्रतिवसति ॥ प्रणम्य ॥ इयं च महामुनिभिरुपास्यमाना भगवती विष्णुभक्तिः शान्त्या सह किमपि मन्त्रयते । यावदुपसर्पामि ।

॥ इति परिक्रामति ॥

॥ ततः प्रविशति विष्णुभक्तिः शान्तिश्च ॥

शान्तिः ॥ देवि प्रबलचिन्ताकुलहृदयामिव भगवतीमवलोकयामि ।

विष्णुभक्तिः ॥ वत्से एतस्मिन्नतिमहति सांपराये न ज्ञाने

बलवता मोहेनाभियुक्तस्य वत्सविवेकस्य कीदृशो वृत्तान्त इति दुःस्थितमिव मे हृदयं ।

शान्तिः ॥ किमत्र विचिन्त्यं । ननु भगवती चेत् कृतानुग्रहा तन्नियतमेव राज्ञो विवेकस्य विजय इति जानामि ।

विष्णुभक्तिः ॥ वत्से

यद्यप्यभ्युदयः प्रायः प्रमाणादवधार्यते ।
कामं तथापि सुहृदामनिष्टाशङ्कि मानसं ॥ ४ ॥

विशेषतश्च श्रद्धायाश्चिरमनागमनं मनसि संदेहमारोपयति ।

श्रद्धा ॥ उपसृत्य ॥ भगवति प्रणमामि ।

विष्णुभक्तिः ॥ श्रद्धे स्वागतं ।

श्रद्धा ॥ देव्याः प्रसादेन ।

शान्तिः ॥ अम्ब प्रणमामि ।

श्रद्धा ॥ पुत्रि मां परिष्वजस्व ।

शान्तिः ॥ तथा करोति ॥

श्रद्धा ॥ वत्से देव्या विष्णुभक्तेः प्रसादान्मुनिजनचेतःपदं प्राप्नुहि ।

विष्णुभक्तिः ॥ अथ तत्र किं वृत्तं ।

श्रद्धा ॥ यद्देव्याः प्रतिकूलमाचरतामुचितं ।

विष्णुभक्तिः ॥ तद् विस्तरेणावेदय ।

श्रद्धा ॥ आकर्णयतु भगवती । देव्यामादिकेशवायतनादपक्रान्तायामिव किंचिदुत्सृष्टपाटलिम्नि भगवति भास्वति विजयघोषेणाहूयमानानेकवरवीरवहलसिंहनादबधिरितदिगन्ते सततरथतुरगखुरखण्डितभूमण्डलोच्छलद्विपुलरजःपटलान्तरितकिरणमालिनि प्रबलतरकर्णतालास्फालनोच्छलत्समरकरिकुम्भसिन्दूरसन्ध्यायमानदशदिशि प्रलयजलधरध्वानभीषणे तेषामस्माकं च संनद्धे सैन्यसागरे महाराजमहामोहस्य महाराजेन नैयायिकदर्शनं दौत्येन प्रहितं गत्वा च तेनोक्तो महामोहः

विष्णोरायतनान्यपास्य सरितां कूलान्यरण्यस्थलीः
पुण्याः पुण्यकृतां मनांसि च भवान् म्लेच्छान् व्रजेत् सानुगः ।
नो चेत् सत्तु कृपाणदारितभवत्प्रत्यङ्गधाराजरद्-
रक्तास्फीतविदीर्णवक्त्रविवराः फेत्कारिणः फेरवाः ॥ ५ ॥

विष्णुभक्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततो देवि विकटललाटतटताण्डवितभ्रुकुटिना क्रुद्धेन महामोहेनाभिहितं । अनुभवत्वस्य दुर्नयपरिपाकस्य विवेकहतकः फलमित्यभिधाय स्वयं पाखण्डागमाः पाखण्डतर्कशास्त्रैः समं समराय प्रथमं समुद्योजिताः । अत्रान्तरे चास्माकमपि सैन्यशिरसि

वेदोपवेदाङ्गपुराणधर्म-
शास्त्रेतिहासादिभिरुच्छ्रितश्रीः ।
सरस्वती पद्मकरा शशाङ्क-
संकाशकान्तिः सहसाविरासीत् ॥ ६ ॥

विष्णुभक्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततो देवि वैष्णवशैवसौरादयो देव्याः सकाशमागताः ।

विष्णुभक्तिः ॥ ततस्ततः ।

श्रद्धा ॥ तदनन्तरं च

सांख्यन्यायकणादभाषितमहाभाष्यादिशास्त्रैर्वृता
स्फूर्जन्न्यायसहस्रवाङ्निकरैरुद्द्योतयन्ती दिशः ।
मीमांसा समरोत्सुकाविरभवद्धर्मेन्दुकान्तानना
वाग्देव्याः पुरतस्त्रयीत्रिनयना कात्यायनीवापरा ॥ ७ ॥

शान्तिः ॥ अये कथं पुनः स्वभावद्वन्द्विनामागमानां च तर्काणां च समवायः संपन्नः ।

श्रद्धा ॥ पुत्रि

समानान्वयजातानां परस्परविरोधिनां ।
परैः प्रत्यभिभूतानां प्रसूते संगतिः श्रियं ॥ ८ ॥

येन वेदप्रसूतानां तेषामन्तरविरोधेऽपि वेदसंरक्षणाय ना-

स्तिकपक्षप्रतिक्षेपणाय शास्त्राणां साहित्यमेव । आगमानां च तत्त्वं विचारयतामविरोध एव । तथा हि

ज्योतिः शान्तमनन्तमव्ययमजं तत्तद्गुणोन्मीलनाद्
ब्रह्मेत्यच्युत इत्युमापतिरिति प्रस्तूयतेऽनेकधा ।
तैस्तैरेव सदागमैः श्रुतिमुखैर्नानापथप्रस्थितैर्
गम्योऽसौ जगदीश्वरो जलनिधिर्वारां प्रवाहैरिव ॥ ९ ॥

विष्णुभक्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततो देवि परस्परं करितुरगरथपदातीनां निरन्तरशरनिकरधारासंपातोपदर्शितदुर्दिनानां तेषामस्माकं च योधानां तुमुलः संप्रहारः प्रावर्तत । तथा हि

वहलरुधिरतोयास्तत्र सस्रुः स्रवन्त्यो
निबिडपिशितपङ्काः कङ्करङ्कावकीर्णाः ।
शरदलितविदीर्णोत्तुङ्गमातङ्गशैल-
स्खलितरयविकीर्णच्छत्रहंसावतंसाः ॥ १० ॥

तस्मिंश्चातिमहति दारुणे संग्रामे परापरपक्षविरोधितया पाखण्डागमैरग्रे सरीकृतं लोकायतं तत्त्वमन्योन्यसैन्यविमर्दने नष्टं । अन्यत् पाखण्डागमा निर्मूलतया सदागमार्णवप्रवाहेण पर्यस्ताः । सौगतास्तावत् सिन्धुगान्धारमगधान्ध्रहूणबङ्गकलिङ्गादीन् म्लेच्छप्रायान् जनपदान् प्रविष्टाः । पाखण्ड-

दिगम्बरकापालिकादयस्तु पामरबहुलेषु पाञ्चालमालवाभीरावर्तसागरानुकूलेषु निगूढं संचरन्ति । न्यायाद्यनुगतया मीमांसयावगाढप्रहारजर्जरीकृता नास्तिकतर्कास्तेषामेवागमानामनुपदं प्रयाताः ।

विष्णुभक्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततो वस्तुविचारेण कामो हतः । क्षमया क्रोधपारुष्यहिंसादयो निपातिताः । संतोषेण लोभतृष्णादैन्यानृतवादपैशुन्यस्तेयपरिग्रहा निगृहीताः । अनसूयया मात्सर्यं जितं । परोत्कर्षसंभावनया मदो निषूदितः । परगुणाधिक्येन मानः खण्डितः ।

विष्णुभक्तिः ॥ सहर्षं ॥ साधु साधु संपन्नं । अथ महामोहस्य को वृत्तान्तः ।

श्रद्धा ॥ देवि महामोहोऽपि योगोपसर्गैः सह न ज्ञायते क्वापि निलीनस्तिष्ठतीति ।

विष्णुभक्तिः ॥ अस्ति तर्हि महान् अनर्थशेषः प्रहरणीयश्चासौ । यतः

अत्यादरपरो विद्वान् ईहमानः स्थिरां श्रियं ।
अग्नेः शेषमृणाच्छेषं शत्रोः शेषं न शेषयेत् ॥ ११ ॥

अथ मनसः को वृत्तान्तः ।

श्रद्धा ॥ देवि तेनापि पुत्रपौत्रादिव्यसनजनितशोकावेशेन जीवोत्सर्गाय व्यवसितं ।

विष्णुभक्तिः ॥ स्मितं कृत्वा ॥ यद्येवं स्यात् सर्व एव वयं कृतकृत्या भवामः पुरुषश्च परां निवृत्तिमापद्यते । किं तु कुतस्तस्य दुरात्मनो जीवत्यागः ।

श्रद्धा ॥ एवं देव्यां प्रबोधोदयाय गृहीतसंकल्पायामचिरं शरीरेण सह नैव भविष्यति ।

विष्णुभक्तिः ॥ तद्भवतु । अस्य वैराग्योत्पत्तये वैयासिकीं सरस्वतीं प्रेषयामः ।

॥ इति निष्क्रान्ताः ॥

॥ प्रवेशकः ॥

॥ ततः प्रविशति मनः संकल्पश्च ॥

मनः ॥ सास्रं ॥ हा पुत्रकाः क्व गताः स्थ । दत्त मे प्रियदर्शनं । भो भोः कुमारा रागद्वेषमदमानमात्सर्यादयः परिष्वजध्वं मां । सीदन्ति ममाङ्गानि हा न कश्चिन्मां वृद्धमनाथं संभावयति । क्व गता असूयादयः कन्यकाः आशाहिंसातृष्णादयो वा स्नुषाः । कथं ता अपि मन्दभाग्यस्य मे समकालमेव दैवहतकेनापहृताः ।

॥ सवैकृव्यं ॥

विसर्पति विषाग्निवद्दहति शर्ममर्माणि मे
तनोति भृशवेदनाः कषति सर्वकायं वपुः ।
विलुम्पति विवेकितां हृदि च मोहमुन्मीलयत्य्
अहो ग्रसति जीवितं प्रसभमेव शोकज्वरः ॥ १२ ॥

॥ इति मूर्छितः पतति ॥

संकल्पः ॥ राजन् समाश्वसिहि समाश्वसिहि ।

मनः ॥ समाश्वस्य ॥ कथं देवी प्रवृत्तिरपि न मामेवमवस्थं समाश्वासयति ।

संकल्पः ॥ साश्रं ॥ देव कुतोऽद्यापि प्रवृत्तिः । यतः श्रुतकुटुम्बकव्यसनसंजातशोकानलदग्धहृदया हृदयस्फोटं विनष्टा ।

मनः ॥ हा प्रिये क्वासि देहि मे प्रियं प्रतिवचनं । ननु देवि

स्वप्नेऽपि देवि रमसे न मया विना त्वं
सुप्ते त्वया विरहितो मृतवद्भवामि ।
दूरीकृतासि विधिदुर्ललितैस्तथापि
जीवत्यहो हि मन इत्यसवो दुरन्ताः ॥ १३ ॥

॥ इति पुनर्मूर्छति ॥

संकल्प ॥ राजन् समाश्वसिहि समाश्वसिहि ।

मनः ॥ समाश्वस्य ॥ अलमस्माकमतःपरं जीवितेन । संकल्प चितां मा रचय यावदनलप्रवेशेन शोकानलं निर्वापयामि

॥ ततः प्रविशति सरस्वती वैयासिकी ॥

सरस्वती ॥ प्रेषितास्मि भगवत्या विष्णुभक्त्या यथा। सखि सरस्वति गच्छापत्यव्यसनखिन्नस्य मनसः प्रबोधनाय यथा च तस्य वैराग्योत्पत्तिर्भवति तथा यतस्वेति। तद्भवतु। तत्संनिधिमेवोपसर्पामि ॥ उपसृत्य ॥ वत्स किमेवमतिविक्लवो ऽसि। ननु विदितपूर्वैव भवता भावानामनित्यता अधीतानि वैयेतिहासिकान्युपाख्यानानि। तथा हि

भूत्वा कल्पशतायुषो ऽम्बुजभुवः सेन्द्राश्च देवासुरा
मन्वाद्या मुनयो मही जलधयो नष्टाः पराः कोटयः।
मोहः को ऽयमहो महान् उदयते लोकस्य शोकावहो
बन्धोः फेनसमे गते वपुषि यत् पञ्चात्मके पञ्चतां ॥१४॥

तद्भावय भावानामनित्यतां। नित्यानित्यवस्तुदर्शनो न पश्यति शोकावेगं। यतः

एकमेव यदा ब्रह्म सत्यमन्यद्विकल्पितं।
को मोहस्तत्र कः शोक एकत्वमनुपश्यतः ॥ १५ ॥

मनः ॥ भगवति शोकावेगदूषिते मे मनसि विवेक एव नावकाशं लभते।

सरस्वती ॥ वत्स स्नेहदोष एषः। प्रसिद्ध एवायमर्थः स्नेहः सर्वानर्थप्रभव इति। तथा हि

उप्यन्ते विषवल्लिबीजविषमाः क्लेशाः प्रियाख्या नरैस्
तेभ्यः स्नेहमया भवन्ति न चिराद्वज्राग्निगर्भाङ्कुराः ।
येभ्योऽमी शतशः कुकूलकृतभुग्दाहं दहन्तः शनैर्
देहं दीप्तशिखासहस्रशिखरा रोहन्ति शोकद्रुमाः ॥१६॥

मनः ॥ देवि यद्यप्येवं तथापि न शक्नोमि शोकानलदग्धः प्राणान् धारयितुं । साधु संपन्नं यदन्तकाले त्वं तावद्दृष्टासि ।

सरस्वती ॥ इदं च परमकृत्यं यदात्महत्याव्यवसाय इति । अपि चामीषां चापकारिणामर्थे कोऽयमत्यावेगो भवतः । पश्य तावत्

क्वचिदुपकृतिः कर्तामीभिः कृता क्रियतेऽथवा
तव न च भवत्येते पुंसां सुखाय परिग्रहाः ।
दधति विरहे मर्मच्छेदं तदर्थमपार्थकं
तदपि विपुलायासाः सीदन्त्यहो बत जन्तवः ॥ १७ ॥

अपि च ।

तीर्णाः पूर्णाः कति न सरितो लङ्घिताः के न शैला
नाक्रान्ता वा कति वनभुवः क्रूरसंचारघोराः ।
पापैरेतैः किमिव दुरितं कारितो नासि कष्टं
यद्दृष्टास्ते धनमदमषीम्लानवक्त्रा दुरीशाः ॥ १८ ॥

मनः ॥ देवि एवमेतत् । तथापि

लालितानां स्वजातानां हृदि संचरतां चिरं ।
प्राणानामिव विच्छेदो मर्मच्छेदादरुन्तुदः ॥ १९ ॥

सरस्वती ॥ वत्स ममतावासनानिबन्धनोऽयं व्यामोहः । उक्तं च

मार्जारभक्षिते दुःखं यादृशं गृहकुक्कुटे ।
न तादृङ्ममताशून्ये कलम्बिकेऽथ मूषके ॥ २० ॥

तत् सर्वानर्थबीजस्य ममत्वस्योच्छेदे यत्नः कर्तव्यः । पश्य

प्रादुर्भवन्ति वपुषः कति वा न कीटा
यान् यत्नतः खलु तनोरपसारयन्ति ।
मोहः क एष जगतो यदपत्यसंज्ञां
तेषां विधाय परिशोषयति स्वदेहं ॥ २१ ॥

मनः ॥ देवि भवत्वेवं तथापि दुरुच्छेद्यस्तु ममत्वग्रन्थिः । तथा हि तावदवधारयतु भवती

निरन्तराभ्यासदृढीकृतस्य
सन्नेहसूत्रग्रथितस्य जन्तोः ।
जानासि किंचिद्भगवत्युपायं
ममत्वपाशस्य यतो विमोक्षः ॥ २२ ॥

सरस्वती ॥ वत्स भावानामनित्यताभावनमेव तावन्ममतोच्छेदस्य प्रथमोऽभ्युपायः । तथा हि

न कति पितरो दाराः पुत्राः पितृव्यपितामहा
महति वितते संसारेऽस्मिन् गतास्तव कोटयः ।
तदिह सुहृदां विद्युत्पातोज्ज्वलान् क्षणसंगमान्
सपदि हृदये भूयो भूयो निवेश्य सुखी भव ॥ २३ ॥

मनः ॥ भगवति तव प्रसादादपास्त एव व्यामोहः । किं तु
तव मुखशशधरदीधितिगलितैर्विमलोपदेशपीयूषैः ।
क्षालितमपि मे हृदयं मलिनं शोकोर्मिभिः क्रियते ॥ २४ ॥
तदस्यार्द्रस्य शोकप्रहारस्य भेषजमाज्ञापयतु भगवती ।

सरस्वती ॥ वत्स नूनमुपदिष्टमेवात्रमुनिभिः ।
अकाण्डपातजातानामार्द्राणां मर्मभेदिनां ।
गाढशोकप्रहाराणामचिन्तैव महौषधिः ॥ २५ ॥

मनः ॥ भगवति एवमेतत् । दुर्वारं तु चेतः । यतः
अप्येतद्वारितं चिन्तासंतानैरभिभूयते ।
मुहुर्वाताहतैर्बिम्बमभ्रच्छेदैरिवैन्दवं ॥ २६ ॥

सरस्वती ॥ वत्स श्रूयतां चेतसोऽयं विकारः । ततः क्वचिच्छान्ते विषये चेतो निवेशय ।

मनः ॥ तत् प्रसीदतु भवती कोऽसौ शान्तो विषयः ।

सरस्वती ॥ वत्स गुह्यमेतत् । तथाप्यार्तानामुपदेशे न दोषः ।

नित्यं स्मरन् जलदनीलमुदारहार-
केयूरकुण्डलकिरीटधरं हरिं वा ।
ग्रीष्मे सुशीतमिव वा ह्रदमस्तशोकं
ब्रह्म प्रविश्य भज निर्वृतिमात्मनीनां ॥ २७ ॥

मनः ॥ विचिन्त्य सोच्छ्वासं ॥ सर्वथा त्रातोऽस्मि भगवत्या ।

॥ इति पादयोः पतति ॥

सरस्वती ॥ वत्स प्रत्युपदेशसक्तिषु ते हृदयं जातं । मयैतदप्यपरमुच्यते ।

वशं प्राप्ते मृत्योः पितरि तनये वा सुहृदि वा
शुचात्मं तप्यन्ते भृशमुदरताडं जडधियः ।
असारे संसारे विरसपरिणामे तु विदुषां
वियोगो वैराग्यं दृढयति वितन्वन् शमसुखं ॥ २८ ॥

॥ ततः प्रविशति वैराग्यं ॥

वैराग्यं ॥ विचिन्त्य ॥

अस्माल्लीनवनीलनीरजदलोपान्तातिसूक्ष्मं पुनस्
त्वङ्मात्रान्तरितामिषं यदि वपुर्नैतत् प्रजानां पतिः ।
प्रत्यग्रक्षतरक्तमिश्रपिशितग्रासग्रहं गृध्नतो
गृध्रध्वाङ्क्षवृकान् शुनो निपततः क्रोष्ट्रान् कथं वारयेत् ॥

अपि च ।

श्रियो दोलालोला विषयजरसाः प्रान्तविरसा
विपद्गेहं देहं महदपि धनं भूरिनिधनं ।
बृहच्छोको लोकः सततमबलानर्थबहुला
तथाप्यस्मिन् घोरे पथि बत रता नात्मनि रताः ॥ ३० ॥

सरस्वती ॥ वत्सैतद्वैराग्यं त्वामुपस्थितं । तदेतत् संभावय ।

मनः ॥ क्वासि पुत्रक ।

वैराग्यं ॥ उपसृत्य ॥ अहं भो अभिवादये ।

मनः ॥ वत्स जातमात्रेण त्वया त्यक्तोऽस्मि । परिष्वजस्व मां ।

वैराग्यं ॥ तथा करोति ॥

मनः ॥ वत्स त्वद्दर्शनात् प्रशान्तो मे शोकावेशः ।

वैराग्यं ॥ तात कोऽत्र शोकावेशः । यतः

पान्थानामिव वर्त्मनि क्षितिरुहां नद्यामिव भ्रश्यतां
मेघानामिव पुष्करे जलनिधौ सांयात्रिकाणामिव ।
संयोगः पितृमातृबन्धुतनयभ्रातृप्रियाणां सदा
सिद्धो दूरवियोग एव विदुषां शोकोदयः कस्तदा ॥ ३१ ॥

मनः ॥ सानन्दं ॥ देवि एवमेतत् यदाह वत्सः । सम्प्रति हि
नार्यस्ता नवयौवना मधुकरव्याहारिणस्ते द्रुमाः
प्रोन्मीलन्नवमल्लिकासुरभयो मन्दास्त एवानिलाः ।

अद्योदात्तविवेकमार्जिततमःस्तोमव्यलीकं पुनस्
तान् एतान् मृगतृष्णिकार्णवपयःप्रायान् मनः पश्यति ॥३२॥

सरस्वती ॥ वत्स यद्यप्येवं तथापि गृहिणा मुहूर्तमप्यनाश्रमधर्मिणा न भवितव्यं । तदद्यप्रभृति निवृत्तिरेव ते सधर्मचारिणी ।

मनः ॥सलज्जं॥ यदादिशति देवी ।

सरस्वती ॥ शमदमसंतोषादयश्च पुत्रास्त्वामुपचरन्तु यमनियमादयश्चामात्याः । विवेकोऽपि त्वदनुग्रहादुपनिषद्देव्या सह यौवराज्यमनुभवतु । एताश्च मैत्र्यादयश्चतस्रो भगिन्यो भगवत्या विष्णुभक्त्या तव प्रसादनाय प्रहितास्ताः सप्रसादमनुमानय ।

मनः ॥ यदादिशति देवीति मूर्ध्नि निवेशिताः सर्वा एवाज्ञाः ।

॥ इति सहर्षं पादयोः प्रणमति ॥

सरस्वती ॥ यमनियमासनप्राणायामादयः सादरमायुष्मता द्रष्टव्याः । एतैरेव सहायुष्मान् साम्राज्यमधितिष्ठतु । त्वयि च स्वास्थ्यमापन्ने क्षेत्रज्ञोऽपि स्वां प्रकृतिमापत्स्यते । यतः

त्वत्सङ्गाच्छाश्वतोऽपि प्रभवलयजरोपप्लुतो बुद्धिवृत्तिष्व्
एको नानेव देवो रविरिव जलधेर्वीचिषु व्यस्तमूर्तिः ।

तूष्णीमालम्ब्यसे चेत् कथमपि विततां वर्त्म संहृत्य वृत्तीर्
भात्यादर्शे प्रसन्ने रविरिव सहज्ञानन्दसान्द्रस्तदात्मा ॥
तद्भवतु ज्ञातीनामुदकदानाय नदीमवतरामः ।
सर्वे ॥ यदाज्ञापयति देवी ।

॥ तदा निष्क्रान्ताः सर्वे ॥

॥ इति ॥

॥ पञ्चमोऽङ्कः ॥

॥ अथ ॥

॥ षष्ठोऽङ्कः ॥

॥ ततः प्रविशति शान्तिः ॥

शान्तिः ॥ आदिष्टास्मि महाराजविवेकेन यथा । वत्से विदितमेव भवत्या यथा किल

अस्तंगतेषु तनयेषु विलीनमोहे
वैराग्यभाजि मनसि प्रशमं प्रपन्ने ।
क्लेशेषु पञ्चसु गतेषु समं समीहां
तत्त्वावबोधमभितः पुरुषस्तनोति ॥ १ ॥

तद्भवती त्वरिततरं देवीमुपनिषदमनुनीय मत्सकाशमानय-
त्विति ॥ विलोक्य ॥ अये एषाम्बा सहर्षं किमपि मन्त्रयन्तीत
एवागच्छति ।

॥ ततः प्रविशति श्रद्धा ॥

श्रद्धा ॥ अये अद्य खलु राजकुलमारोग्यमालोक्य चिरेण मे
पीयूषेणेव लोचने पूर्णे ।

असतां निग्रहो यत्र सन्तः पूज्या यमादयः ।
आराध्यते जगत्स्वामी वर्ण्यैर्देवानुजीविभिः ॥ २ ॥

शान्तिः ॥ उपसृत्य ॥ अम्ब किं मन्त्रयन्ती प्रस्थिता ।

श्रद्धा ॥ अये अयेत्यादि पठति ॥

शान्तिः ॥ अथ मनसि कीदृशी स्वामिनः पुरुषस्य प्रवृत्तिः ।

श्रद्धा ॥ यादृशी वध्यस्य ग्राह्यस्य भवति ।

शान्तिः ॥ तत् किं स्वाम्येव साम्राज्यमलंकरिष्यति ।

श्रद्धा ॥ एवमेतत् । यथात्मानमनुसंधत्तेऽतो देव एव स्वा-
राट् सम्राट् च भवति ।

शान्तिः ॥ अथ देवस्य मायायां कीदृशोऽनुग्रहः ।

श्रद्धा ॥ ननु निग्रह इति वक्तव्यं कथमनुग्रहः शक्यते
वक्तुं । देवोऽपि हि सर्वानर्थबीजमियं माया सर्वथा निग्रा-
ह्येति मन्यते ।

शान्तिः ॥ यद्येवं का तर्हीदानीं राजकुलस्य स्थितिः ।

श्रद्धा ॥ शृणु

नित्यानित्यविचारणा प्रणयिनी वैराग्यमेकं सुहृत्
सन्मित्राणि यमादयः शमदमप्रायाः सहाया मताः ।
मैत्र्याद्याः परिचारिकाः सहचरी नित्यं मुमुक्षा बलाद्
उच्छेद्या रिपवश्च मोहममतासंकल्पसङ्गादयः ॥ ३ ॥

शान्तिः ॥ अथ धर्मस्य स्वामिनः कीदृशः प्रणयः ।

श्रद्धा ॥ पुत्रि वैराग्यसंनिकर्षात् प्रभृति नितान्तमिहामुत्रफलभोगविरस एव स्वामी । तेन

स नरकादिव पापफलाद्भयं
भजति पुण्यफलादपि नाशिनः ।
इति समुज्झितकामसमन्वयं
सुकृतकर्म कथंच न मन्यते ॥ ४ ॥

किं त्वसौ प्रत्यक्प्रवणतां स्वामिनो विचिन्त्य कृतकृत्यमिवात्मानं स मत्वा स्वयमेव धर्मः शून्यव्यापारोऽभूत् ।

शान्तिः ॥ अथ तान् उपसर्गान् गृहीत्वा महामोहो निलीय स्थितस्तेषां को वृत्तान्तः ।

श्रद्धा ॥ पुत्रि तथा दुरवस्थागतेनापि महामोहहतकेन स्वामिनः प्ररोचनाय मधुमत्या विद्यया सहोपसर्गाः प्रेपिताः ।

अयं चाभिप्रायो यद्येतेष्वासक्तः स्वामी विवेक उपनिषच्चिन्तामपि न करिष्यतीति ।

शान्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततस्तैर्गत्वा कापि स्वामिन्यैन्द्रजालिकी विद्योपदर्शिता । तथा हि

शब्दान् एष शृणोति योजनशतादाविर्भवन्त्यश्रुतास्
तास्तां वेदपुराणभारतकथास्तर्कादयो वाङ्मयाः ।
ग्रथ्नाति स्वयमिच्छया शुचिपदैः शास्त्राणि काव्यानि वा
लोकान् भ्राम्यति पश्यति स्फुटरुचो रत्नस्थलीर्मैरवीः ॥५॥

मधुमत्या च भूमिमापन्नः स्थानाभिमानिनीभिर्देवताभिरुपछन्यते । भो इहोपविश्यतां नात्र जन्म मृत्युरनुपाधिरमणीयो देश एषः । त्वामुपस्थितो विविधविलासलावण्यपुण्यमयो मङ्गलार्घव्यग्रपाणिः प्रणयपेशलो विद्याधरीजनः । तदेहि यतो

ऽत्र कनकसिकतास्थलीः स्रवन्तीः
पृथुजघनाः कमलानना घनोरूः ।
मरकतदलकोमला वनालीर्
भज निजपुण्यजितांश्च सर्वभोगान् ॥ ६ ॥

शान्तिः ॥ ततस्ततः ।

श्रद्धा ॥ पुत्रि तदाकर्ण्य मायया श्लाघ्यमेतदित्युक्तं । मनसा चानुमोदितं संकल्पेन प्रोत्साहितं स्वामी संमतिपथमिवापन्नः ।

शान्तिः ॥ सखेदं ॥ पुनरपि तामेव संसारवागुरामभिपतितः स्वामी ।

श्रद्धा ॥ न खलु न खलु ।

शान्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततः परिपार्श्ववर्तिना तर्केण तान् सर्वान् क्रोधावेशकषायितनयनमालोक्याभिहितः स्वामी । स्वामिन् किमेवमेभिर्विषयामिषग्रासगृध्नुभिरास्थानीधूर्तकैः पुनरपि तेष्वेव तथैव विषमविषयाङ्गारेषु निपात्यमानमात्मानं नावबुध्यसे । ननु भोः

भवसागरतारणाय या
न चिराद्योगतरिस्त्वयाश्रिता ।
अधुना परिमुच्य तां मदात्
कथमङ्गारनदीं विगाहसे ॥ ७ ॥

शान्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततस्तद्वचनमाकर्ण्य स्वस्ति विषयेभ्य इत्यवधार्यावधीरिता मधुमती ।

शान्तिः ॥ साधु साधु । अथ क्व प्रस्थितास्ति भवती ।

श्रद्धा ॥ आदिष्टाहं स्वामिना यथा । विवेकं प्रष्टुमिच्छामि तत् त्वरतां भवती । तदहं राजसंनिधिं प्रस्थिता ।

शान्तिः ॥ अहमपि महाराजेनोपनिषदमानेतुमादिष्टा । तद्भवतु स्वामिनियोगं संपादयावः ।

॥ इति निष्क्रान्ते ॥

॥ प्रवेशकः ॥

ततः प्रविशति पुरुषः ॥

पुरुषः ॥ विचिन्त्य सहर्षं ॥ अहो माहात्म्यं देव्या विष्णुभक्तेर्यत्प्रसादान्मया

तीर्णाः क्लेशमहोर्मयः परिहृता भीमा ममत्वभ्रमाः
शान्ता मित्रकलत्रबन्धुमकरग्राहग्रहग्रस्तयः ।
क्रोधौर्वाग्निरपाकृतो विघटितास्तृष्णालताग्रन्थयः
पारे तीरमवाप्तकल्पमधुना संसारवारां निधेः ॥ ८ ॥

ततः प्रविशति उपनिषत् शान्तिश्च ॥

उपनिषत् ॥ सखि कथं तथानिरनुक्रोशस्य स्वामिनो मुखमालोकयिष्यामि येनाहमितरजनयोषेव सुचिरमेकाकिनी परित्यक्ता ।

शान्तिः ॥ देवि कथं तथाविधविपत्पतितो देव उपालभ्यते ।

उपनिषत् ॥ सखि न दृष्टा त्वया मे तादृशी दशा येनैवं ब्रवीषि । शृणु

वाह्वोर्भग्ना दलितमणयः श्रेणयः कङ्कणानां
चूडारत्नग्रहनिकृतिभिर्दूषितः केशपाशः ।
कैः कैर्नाहं कृतविधिबलादोहिता दुर्विदग्धैर्
दासीकर्तुं सपदि दुरितैर्दूरसंस्थे विवेके ॥ १ ॥

शान्तिः ॥ सर्वमेतन्महामोहस्य दुर्विलसितं नात्र देवस्यापराधः । तेन हि मनः कामादिद्वारेण प्रबोधयता त्वत्तो दूरीकृतो विवेकः । एतदेव कुलस्त्रीणां नैसर्गिकं शीलं यद्विपन्मग्नस्य स्वामिनः समयप्रतीक्षणमिति । तदेतदिह दर्शनप्रियालापेन संभावय देवं । सम्प्रत्यपहता विद्विषः संपूर्णास्ते मनोरथाः ।

उपनिषत् ॥ सखि सम्प्रत्यागच्छन्ती वत्सया गीतयाहं रहस्युक्ता यथा । भर्ता स्वामी च पुरुषस्त्वया यथा प्रश्नोत्तरेण संभावयितव्यस्तथा प्रबोधोत्पत्तिर्भविष्यतीति । तत् कथं गुरूणामभ्यक्षं धार्ष्ट्यं करिष्यामि ।

शान्तिः ॥ देवि अविचारणीयमेतद्वाक्यं भगवत्या गीतायाः । अयमेव स्वार्थो भगवत्या विप्रुभक्त्या स्वामिनो निरुक्तः । तदेहि संभावय दर्शनेन भर्तारमादिपुरुषं च ।

उपनिषत् ॥ यथा वदति प्रियसखी ।

॥ इति परिक्रामति ॥

॥ ततः प्रविशति राजा श्रद्धा च ॥

राजा ॥ वत्से अपि हृष्यति शान्तिः प्रियामुपनिषदं ।

श्रद्धा ॥ देव गृहीतोपदेशैव शान्तिर्गता कथं तां न हृष्यति ।

राजा ॥ कथमिव ।

श्रद्धा ॥ देव प्रागेव कथितमेतद्देव्या विप्लुभतयासीद्यथा । मन्दराभिधाने शैले विष्णोरायतने देव्यां गीतायां तर्कविद्या-भयादनुप्रविष्टेति ।

राजा ॥ कथं पुनस्तर्कविद्याया भयं ।

श्रद्धा ॥ देव तमर्थं सैव प्रस्तोष्यति । तदागच्छतु देवः । एष स्वामी त्वदागमनमेव ध्यायन् विविक्ते वर्तते ।

राजा ॥ उपसृत्य ॥ स्वामिन्नभिवादये ।

पुरुषः ॥ वत्स प्रक्रमविरुद्धोऽयं समुदाचारो यतो ज्ञानवृद्ध-तया भवान् एवास्माकमुपदेशदानेन पितृभावमापन्नः । कुतः

पुरा हि धर्माध्वनि नष्टसंज्ञा
देवास्तमर्थं तनयान् अपृच्छन् ।
ज्ञानेन सम्यक् परिगृह्य चैतान्
हे पुत्रकाः संशृणुतेत्यवोचन ॥ १० ॥

तद्भवान् पितृत्वेनास्मासु वर्ततामित्येष एव धर्मः ।

शान्तिः ॥ एष देवि देवेन सह स्वामी विविक्ते वर्तते । तदुपसर्पतु देवी ।

उपनिषत् ॥ उपसर्पति ॥

शान्तिः ॥ स्वामिन्नेषोपनिषद्देवी पादवन्दनायागता ।

पुरुषः ॥ न खलु न खलु । मातेयमस्माकं तत्त्वावबोधोदयेन तदेषैवास्माकं नमस्या । अथ वा

अनुग्रहविधौ देव्या मातुश्च महदन्तरं ।
माता गाढं निबध्नाति बन्धं देवी निकृन्तति ॥ ११ ॥

उपनिषत् ॥ विवेकमालोक्य नमस्कृत्य दूरे समुपविशति ॥

पुरुषः ॥ अम्ब कथ्यतां क्व भवत्या नीता एते दिवसाः ।

उपनिषत् ॥ स्वामिन् नीतान्यमूनि मठचत्वरशून्यदेवागारेषु मूर्खमुखरैः सह वासराणि ।

पुरुषः ॥ अथ ते जानन्ति किमपि भवत्यास्तत्त्वं ।

उपनिषत् ॥ न खलु । किं तु

ते स्वेच्छया मम गिरां द्रविडाङ्गनोता-
वाचामिवार्थमविचार्य विकल्पयन्ति ॥ १२ ॥

तेन केवलं तेषां परार्थग्रहणप्रयोजनमेव मद्विचारणं ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततः कदाचित्

कृष्णाजिनाग्निसमिदाज्यजुहूस्रुवादि-
पात्रैस्तथेष्टि पशुसोममुखैर्मखैश्च ।
दृष्टा मया परिवृता किल कर्मकाण्ड-
व्यादिष्टपद्धतिरथाध्वनि यज्ञविद्या ॥ १३ ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो मया चिन्तितमपि नामैषा पुस्तकभारवाहिनी मे ज्ञास्यति तत्त्वमत एव तस्याः संनिधौ कानिचिद्वासराणि नयामि ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततस्तामहमुपस्थिता तया चाहमुक्तास्मि भद्रे किं ते समीहितमिति । ततो मयोक्तं आर्ये अनाथास्मि त्वयि निवस्तुमिच्छामीति ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततस्तयोक्तं भद्रे किं ते कर्मेति ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो मयोक्तं

यस्माद्विश्वमुदेति यत्र रमते यस्मिन् पुनर्लीयते
भासा यस्य जगद्विभाति सहजानन्दोज्ज्वलं यन्महः ।

शान्तं शाश्वतमक्रियं यमपुनर्भावाय भूतिश्वरं
द्वैतध्वान्तमपास्य यान्ति कृतिनः प्रस्तौमि तं पूरुषं ॥१४॥

ततस्तयोक्तं

पुमान् अकर्ता कथमीश्वरो भवेत्
क्रियाभवोच्छेदकरी न वस्तुधीः ।
कुर्वन् क्रिया एव नरो भवच्छिदः
शतं समाः शान्तमना जिजीविषेत् ॥ १५ ॥

तन्मे नातिप्रयोजनं भवत्याः परिग्रहेण । तथापि यदि कर्तारं भोक्तारं पुरुषं स्तौषि कियत्कालमत्र वस्तुमिच्छसि को दोषः ।

राजा ॥ सोपहासं ॥ अहो धूमान्धकारश्यामलितदृशो दुःप्रज्ञत्वं यज्ञविद्याया येनैवं कुतर्कोपहता ।

अयः स्वभावादचलं बलाच्चलत्य्
अचेतनं चुम्बकसंनिधाविव ।
तनोति विश्वेक्षितुरीक्षितेरिता
जगन्ति मायेश्वरतेयमीशितुः ॥ १६ ॥

तस्मात् तमोऽन्धानामेवेयमीदृशी दृष्टिः । अप्रबोधप्रभवं च संसारं कर्मभिः शमयन्ती यज्ञविद्या नूनमन्धतमसमन्धकारेणापनिनीषति ।

स्वभावलीनानि तमोमयानि
प्रकाशयेयो भुवनानि सप्त ।
तमेव विद्वान् अति मृत्युमेति
नान्योऽस्ति पन्था भवमुक्तिहेतुः ॥ १७ ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो यज्ञविद्यया विमृश्योक्तं । सखि त्वत्संनिकर्षाद्दुर्वासनोपहतैरस्मदन्तेवासिभिः कर्मसु श्लथादरैर्भवितव्यं तत् प्रसीदतु भवती स्वाभिलषितदेशगमनाय ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततोऽहं तामतिक्रम्य प्रस्थिता ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततः कर्मकाण्डसहचरी मीमांसा मया दृष्टा

विभज्य कर्माण्यधिकारभागी
श्रुत्यादिभिश्चानुगता प्रमाणैः ।
अङ्गैर्विचित्रैरभियोजयन्ती
प्राप्तोपदेशैरतिदेशगैश्च ॥ १८ ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततोऽहं तामपि तथैवाश्रयमभ्यर्थितवती ।

अथ तयाप्युक्तास्मि भद्रे किंकर्मासीति । ततो मया तद्वोक्तं
॥ यस्माद्विश्वमित्यादि पठति ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो मीमांसया पार्श्ववर्तिनां मुखमवलोक्याभिहितं । अस्त्येवास्माकमस्या लोकान्तरफलोपभोगयोग्यपुरुषोपनयने नोपयोगः तदीयतामेषा कर्मोपयुक्ता । तत्र तेषामन्तेवासिनां मध्ये केनाप्यन्तेवासिनैतदनुमोदितमेव । अपरेण तु प्रसिद्धप्रतिष्ठेन मीमांसाहृदयाधिदैवतेन कुमारिलस्वामिना प्रोक्तं देवि नेयं कर्मोपयुक्तं पुरुषमुपनयति किं त्वकर्तारमभोक्तारमीश्वरं न चासावीश्वरः कर्मसूपयुज्यते । ततोऽपरेणोक्तं । अथ किं लौकिकात् पुरुषादन्य ईश्वरो नामास्ति । ततस्तेन विहस्य पुनरुक्तं । अस्ति । तथा हि

एकः पश्यति चेष्टितानि जगतामन्यस्तु मोहान्धधीर्
एकः कर्मफलानि वांछति ददात्यन्यस्तु तान्यर्थिने ।
एकः कर्मसु शिष्यते तनुभृतां शास्तेव देवोऽपरो
निःसङ्गः पुरुषः क्रियासु स कथं कर्तेति संभाव्यते ॥ १९ ॥

राजा ॥ सहर्षं ॥ साधु कुमारिलस्वामिन् साधुप्रज्ञोऽस्यायुष्मन् ।

द्वौ तौ सुपर्णौ सयुजौ सखायौ
समानवृक्षं परिषस्वजाते ।

एकस्तयोः पिप्पलमत्ति पक्वं
अन्यस्त्वनश्नन्नभिचाकशीति ॥ २० ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततोऽहं मीमांसामभिमन्त्र्य प्रस्थिता ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो मया बहुभिः शिष्यैरुपास्यमानास्तर्कविद्या अवलोकिताः ।

काचिद्विश्वविशेषकल्पनपरा न्यायैः परा तन्वती
वादं सच्छलजातिनिग्रहमयैर्जल्पं वितण्डामपि ।
अन्या तु प्रकृतेर्विभज्य पुरुषस्योदाहरन्ती भिदां
तत्त्वानां गणनापरा महदहंकारादिसर्गक्रमैः ॥ २१ ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ तथैवाहं ताः समुपस्थिता । ताभिश्चानुयुक्तया मया तदेव कर्मोदाहृतं ॥ यस्मादित्यादि पठति ॥ ततस्ताभिः सप्रकाशोपहासमुक्तं । आ वाचाले परमाणुभ्यो विश्वमुत्पद्यते । अन्यया तु सक्रोधमुक्तं । आः पापे कथमीश्वरमेवं विकारिणं कृत्वा विनाशधर्मिणमुपपादयसि ननु रे प्रधानाद्विश्वोत्पत्तिः ।

राजा ॥ अहो दुर्मतयस्तर्कविद्याः । एतदपि न जानन्ति सर्वं

प्रमेयत्वात् घटादिवत् कार्यमिति परमाणुप्रधानोपादानमप्यपेक्षणीयमेवेति । तथा हि

अम्भःशीतकरान्तरिक्षनगरस्वप्नेन्द्रजालादिवत्
कार्यं मेयमसत्यमेतदुदयध्वंसादियुक्तं जगत् ।
शुक्तौ रूप्यमिव स्रजीव भुजगः स्वात्मावबोधे हराव्
अज्ञाते प्रभवत्यथास्तमयते तत्त्वावबोधोदयात् ॥ २२ ॥

विकारशङ्का तु मुग्धवधूविकल्पविलसितमिव । तथा हि

शान्तं ज्योतिः कथमनुदितानस्तनित्यप्रकाशं
विश्वोत्पत्तौ व्रजति विकृतिं निःकलं निर्मलं च ।
शश्वन्नीलोत्पलदलरुचामम्बुवाहावलीनां
प्रादुर्भावे भवति नभसः कीदृशो वा विकारः ॥ २३ ॥

पुरुषः ॥ साधु साधु प्रीणयति मानसं ममायं प्रज्ञावतो विमर्शः ॥ उपनिषदं प्रति ॥ ततस्ततः ।

उपनिषत् ॥ ततस्ताभिः सर्वाभिरुक्तं । अहो विश्वविलयेन मुक्तिमेषा वदन्ती नास्तिकपथं प्रस्थिता निगृह्यतामिति । ततः ससंरम्भं मां निग्रहीतुं प्रधाविताः सर्वाः ।

पुरुषः ॥ सत्रासं ॥ ततस्ततः ।

उपनिषत् ॥ ततोऽहं सत्वरतरं परिक्रम्य दण्डकारण्ये प्रविष्टा । ततो मन्दरशैलोपकल्पितस्य मधुसूदनायतनस्य नातिदूरे ।

वाह्वोर्भग्ना दलितमणयः श्रेणयः कङ्कणानां
चूडारत्नग्रहनिकृतिभिर्दूषितः केशपाशः ।

इत्याद्यवस्था मम संजाता ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो देवायतनान्निर्गत्य गदापाणिभिः पुरुषैरतिनिर्दयं ताड्यमानास्ता दिगन्तमतिक्रान्ताः सर्वाः ।

राजा ॥ सहर्षं ॥ न खलु भवतीमतिक्रामतो भगवान् विश्वसाक्षी क्षमते ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥

छिन्ना मुक्तावलिरपहृतं स्रस्तमङ्गाद्दुकूलं
भीता गीताश्रममथ गलन्नूपुराहं प्रविष्टा ॥ २४ ॥

तत्र च वत्सया गीतया मां तत्रागतामालोक्य ससंभ्रमं मातर्मातरिति परिरभ्योपवेशितास्मि । विदितवृत्तान्तया तया च तथोक्तं । अम्ब नात्र खेदयितव्यं मनो ये खलु त्वामप्रमाणीकृत्य यथेष्टमसुरसत्त्वाः प्रचरिष्यन्ति तेषामीश्वर एव शास्ता । उक्तं च तेन भगवता तान् अधिकृत्य (तथा च गीता)

तान् अहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभान् आसुरीष्वेव योनिषु । इति ॥ २५ ॥

पुरुषः ॥ सकौतुकं ॥ देवि त्वत्प्रसादाज्ज्ञातुमिच्छामि कोऽयमीश्वरो नामेति ।

उपनिषत् ॥ सकोपमिव ॥ कोऽज्ञानन्तं तमन्धमिव प्रत्युत्तरं दास्यति ।

पुरुषः ॥ सहर्षं ॥ कथमहमात्मा पुरुषः परमेश्वरः ।

उपनिषत् ॥ एवमेतत् । तथा हि

असौ त्वदन्यो न सनातनः पुमान्
भवान् न देवात् पुरुषोत्तमात् परः ।
स एव भिन्नस्त्वमनादिमायया
द्विधेव विम्बं सलिले विवस्वतः ॥ २६ ॥

पुरुषः ॥ विवेकं प्रति ॥ भगवन्नुक्तमर्थं भगवत्या न संयगवधारयामि ।

अवछिन्नस्य भिन्नस्य जरामरणधर्मिणः ।
मम ब्रवीति देवीयं सत्यानन्दचिदात्मतां ॥ २७ ॥

विवेकः ॥ पदार्थानवज्ञानाद्वाक्यार्थो नावगम्यते । आर्येणोक्तं तत् सत्यमेव ।

पुरुषः ॥ तदवबोधाय भवान् उपायमाज्ञापयतु ।

विवेकः ॥

एषोऽस्मीति विविच्य नेति परितश्चित्तेन सार्द्धं कृते
तत्वानां विलये चिदात्मनि परिज्ञाते त्वमर्थे पुनः ।

श्रुत्वा तत्त्वमसीति बाधितभवध्वान्तं तदात्मप्रभं
शान्तं ज्योतिरनन्तमन्तरुदितानन्दं समुद्द्योतते ॥ २८ ॥

पुरुषः ॥ सानन्दं श्रुतमर्थं परिभावयति ॥

॥ ततः प्रविशति निदिध्यासनं ॥

निदिध्यासनं ॥ आदिष्टोऽस्मि भगवत्या विष्णुभक्त्या यथा । निगूढमस्मदभिप्रायमुपनिषद्विवेकेन सह बोधयितव्या त्वया च पुरुषे वक्तव्यमिति ॥ विलोक्य ॥ एषा देवी विवेकपुरुषाभ्यां नातिदूरे वर्तते । यावदुपसर्पामि ॥ उपसृत्योपनिषदं प्रति जनान्तिकं ॥ देव्या विष्णुभक्त्या समादिष्टं यथा संकल्पयोनयो देवता भवन्ति मया च समाधानेन विदितं यथा आपन्नसत्त्वा भवतीति तत्र क्रूरसत्त्वा विद्या नाम कन्या त्वदुदरे वर्तते प्रबोधचन्द्रोदयश्च तत्र विद्यां संकर्षणविद्यया मनसि संक्रामयिष्यति प्रबोधचन्द्रोदयं च पुरुषे समर्प्य भवत्या विवेकेन सह मत्सकाशमागन्तव्यमिति ।

उपनिषत् ॥ यदादिशति देवी ।

॥ इति विवेकमादाय निःक्रान्ता ॥

निदिध्यासनं ॥ पुरुषं विशति ॥

पुरुषः ॥ ध्यानं नाटयति ॥

॥ नेपथ्ये ॥ आश्चर्यमाश्चर्यं ।

उद्दामद्युतिदामभिस्तडिदिव प्रद्योतयन्ती दिशः
प्रत्यक्षस्फुतदुत्कटास्थि मनसो निर्भिद्य वक्षःस्थलं ।
कन्येयं सहसा समं परिकरैर्मोहं ग्रसन्ती भजत्य्
अन्तर्धानमुपैति चैकपुरुषं श्रीमान् प्रबोधोदयः ॥ २५ ॥

॥ ततः प्रविशति प्रबोधोदयः ॥

प्रबोधोदयः ॥
किं व्याप्तं किमपोहितं किमु हृतं किं वा समुत्सारितं
स्फूतं किं नु विलायितं नु किमिदं किंचिन्न वा किंचन ।
यस्मिन्नभ्युदिते वितर्कपदवीं नैवं समारोहति
त्रैलोक्यं सहजप्रकाशदलितं सोऽहं प्रबोधोदयः ॥ ३० ॥
॥ परिक्राम्य ॥ एष पुरुषः । यावदुपसर्पामि ॥ उपसृत्य ॥ भगवन्
प्रबोधचन्द्रोदयोऽभिवादयते ।
पुरुषः ॥ सह्लादं ॥ एहि वत्स परिष्वजस्व मां ।
प्रबोधोदयः ॥ तथा करोति ॥
पुरुषः ॥ सानन्दं ॥ अहो विघटितं तिमिरपटलं प्रभातं संजातं ।
तथा हि
मोहान्धकारमवधूय विकल्पनिद्रां
उन्मथ्य कोऽप्यजनि बोधतुषाररश्मिः ।

श्रद्धाविवेकमतिशान्तियमादि येन
विश्वात्मकं स्फुरति विष्णुरहं स एषः ॥ ३१ ॥

सर्वथा कृतकृत्योऽस्मि भगवत्या विष्णुभक्तेः प्रसादात्। सोऽहमिदानीं

संगं न केनचिदुपेत्य किमप्यपृच्छन्
गच्छन् न तर्कितफलं विदिशं दिशं वा ।
शान्तो व्यपेतभयशोककषायमोहः
सायंगृहो मुनिरहं भवितास्मि सद्यः ॥ ३२ ॥

॥ ततः प्रविशति विष्णुभक्तिः ॥

विष्णुभक्तिः ॥ सहर्षमुपसृत्य ॥ चिरेण खल्वस्माकं संपन्नाः सर्वे मनोरथा येन प्रशान्ताराातिं भवन्तमवलोकयामि ।

पुरुषः ॥ देव्या विष्णुभक्तेः प्रसादात् किं नाम दुष्करं ।

॥ इति पादयोः पतति ॥

विष्णुभक्तिः ॥ पुरुषमुत्थापयति ॥ उत्तिष्ठ वत्स । किं ते भूयः प्रियमुपकरोमि ।

पुरुषः ॥ अतः परमपि किं प्रियमस्ति । यतः

प्रशान्ताारातिरगमद्विवेकः कृतकृत्यतां ।
नीरजास्मि सदानन्दे पदे चाहं निवेशितः ॥ ३३ ॥

तथाप्येतदस्तु ।

पर्जन्योऽस्मिन् जगति महतीं वृष्टिमिष्टां विधत्तां
राजानः क्ष्मां गलितविविधोपप्लवाः पालयन्तु ।
तत्त्वोन्मेषोपहततमसस्त्वत्प्रसादान्महान्तः
संसाराब्धिं विषयममतातङ्कपङ्कं तरन्तु ॥ ३४ ॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति ॥
॥ षष्ठोऽङ्कः ॥

॥ इति श्रीकृष्णमिश्रविरचितं प्रबोधचन्द्रोदयनाम नाटकं समाप्तं ॥

BONNAE, EX OFFICINA TYPOGRAPHICA CAROLI GEORGII

CORRIGENDA.

P. 3. l. 10. pro सम्राज्ये lege साम्राज्ये
» 4. » 6. » घुम्मन्त (sans. घूर्मत्) l. घुण्णन्त (sans. घूर्णत्)
» 5. » 17. » वोदयऽ l. वोदयः
» 7. » 6. » नवमल्लिकाः सुरभयो l. नवमल्लिकासुरभयो
» 10. » 5. » पितो’ l. पित्रो°
» — » — » तावद् l. तात°
» 22. » 1. » कल्यानं l. कल्याणं
» 23. » 15. » अस्मच्छालक° l. अस्यच्छूयालक°
» 25. » ult. » तथात्युदा° l. तथा क्षुदा°
» 27. » 7. » कल्पना विनिर्मित° l. कल्पनावि°
» — » 11. » पुनः छिन्नाद् l. पुनश्छिन्नाद्
» 28. » 15. » नित्यिरहिं l. तित्यिरहिं
» 32. » 13. » गृहीवा l. गृहीत्वा
» 39. » 1. comma post vocem परमपिआ delendum.
» 47. » 1. pro पामन्ताणं l. रमन्ताणं (sans. रमयतां)
» 48. » 18. » न खलु मात्र° l. न खलु नाममात्र°
» 50. » 12. » क्षणाः l. लक्षणाः
» 51. » 3. » बुद्धेनोक्तः अयं l. बुद्धेनोक्तोऽयं
» 54. » 12. » श्रेष्टान् l. श्रेष्ठान्
» 57. » 8. » रपडा l. रपडाः
» 59. » 12. » नास्मद्° l. तेनास्मद्°
» — » 17. » शोभना et लोचना l. शोभने et लोचने
» 69. » 16. » विवृत्तिः l. निवृत्तिः
» 71. » 6. » कृतं l. कृतः
» 74. » 5. » दृष्टैः l. दृष्टेः
» 78. » 13. » सह्यन्तां l. सह्ह्यन्तां

Pag. 80. lin. 7. pro मुक्तैः l. मुक्तः
» 84. » 15. » विष्णुभक्तैः l. विष्णुभक्तेः
» 86. » 18. » प्रत्यक्षिभूतानां l. प्रत्यभिभू°
» 87. » ult. » ज्ञयपदान् lege जनपदान्
» 91. » 14. » अन्यद्विदकल्पितं l. अन्यद्विक°
» 92. » 11. » भवत्येते l. भवन्त्येते
» 93. » 6. » कलम्बिके l. कलविङ्के
» 94. » 14. » वाताहृतैर् l. वाताहतैर्
» 95. » 17. » गृध्नतो l. गृह्णतो
» 97. » 17. » स्वास्थ्यामापन्ने l. स्वास्थ्यमा°
» 100. » 12. » समन्वयं l. समन्वयः
» — » 15. स delendum.
» 103. » 5. pro संप्रादयावः l. संपाद°
» 106. » 12 et 13. sic vocabula separanda:

स्वामिन्

नीता — देवा —

गारेषु — वासराणि ।

secundum hemistichium vide l. 16. 17.

» 107. » 3. pro तथेष्टि पशु° l. तथेष्टिपशु°
» 108. » 5. » क्रियाभवो l. क्रिया भवो°
» — » 16. » अप्रबोध l. अबोध
» 109. » 13. » भागो l. भाग्नि

LIPSIAE,
PROSTAT APUD F. A. BROCKHAUS.